Digitized by eGangotri

6124. Price R:/2/

श्रीदुर्गास्तोत्रम्

श्री ऋषि वर्य्य मार्कण्डेय प्रणीतम्

यत्र

अर्थ धर्म्म काम मोक्ष दायका स्सप्त शत मन्त्रा वर्त्तिता स्तदेव श्री सरयू प्रसाद संशोधितम्

लखनऊपुरे

श्री मुन्शी नवलकिशोर नामक पाषाण यन्त्रालये मुद्रितम् ॥

मई सन् १८७५ ई०

RANBIR LIBRARY JAMMOO No 3027

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

6124. Price R:/2/

श्रीदुर्गास्तोत्रम्

श्री ऋषि वर्य्य मार्कण्डेय प्रणीतम्

यत्र

अर्थ धर्म्म काम मोक्ष दायका स्सप्त शत मन्त्रा वर्णिता स्तदेव श्री सरयूप्रसाद संशोधितम्

...NBIR LIBR...
No 3027
JAMMOO

लक्ष्मणपुरे

श्री मुन्शी नवलकिशोर नामक पाषाण यन्त्रालये मुद्रितम् ॥

मई सन् १८७५ ई०

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥ मार्कंडेय उवाच ॥ १ ॥ सावर्णि
स्सूर्य्य तनयो योमनुः कथ्यतेऽष्टमः ॥ निशामय तदु-
त्पत्तिं विस्तराद्गदतो मम ॥ २ ॥ महा मायानु भावेन
यथा मन्वंतराधिपः ॥ स बभूव महा भागः सावर्णि
स्तनयो रवेः ॥ ३ ॥ स्वारोचिषेंतरे पूर्वं चैत्र वंश समु-
द्भवः ॥ सुरथो नाम राजा भूत्समस्ते क्षिति मंडले ॥ ४
॥ तस्य पालयत सम्यक् प्रजाः पुत्रानि वौरसान् ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

बभूवुः शत्रवो भूपाः कोलाविध्वंसिन स्तथा ॥ ५ ॥
तस्य तैर भवद्युद्ध मति प्रबल दंडिनः ॥ न्यूनै रपि सतै-
र्युद्धे कोला विध्वंसिभिर्जितः ॥ ६ ॥ ततः स्व पुर मा-
यातो निज देशा धिपोऽभवत् ॥ आक्रांतः स महा भाग
स्तै स्तदा प्रबला रिभिः ॥ ७ ॥ अमात्यै र्बलिभि र्दुष्टै
र्दुर्बलस्य दुरात्मभिः ॥ कोशो बलं चास्य हृतं तत्रापि स्व
पुरे ततः ॥ ८ ॥ ततो मृगया व्याजेन हृत स्वाम्य स्सभूः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

पतिः ॥ एकाकी हयमारुह्य जगाम गहनं वनम् ॥ ९ ॥
सतत्राश्रम मद्राक्षी द्विज वर्यस्य मेधसः ॥ प्रशान्तश्वा
पदाकीर्णं मुनि शिष्योप शोभितम् ॥ १० ॥ तस्थौ कंचि-
त्सकालंच मुनिना तेन सत्कृतः ॥ इतश्चेतश्च विचरं
स्तस्मि न्मुनि वराश्रमे ॥ ११ ॥ सोऽचिन्त यत्तदा तत्र
ममत्वा कृष्ट चेतनः ॥ मत्पूर्वैःपालितं पूर्वं मया हीनं
पुरं हि तत् ॥ १२ ॥ मद्भृत्यै स्तैरसद्वृत्तै र्धर्मतः पाल्यते

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

नवा ॥ न जाने स यथा नामे शूर हस्ती सदा मदः ॥ १३
॥ मम वैरि वशं यातः कान् भोगानु पलप्स्यते ॥ ये ममा
नु गता नित्यं प्रसाद धन भोजनैः ॥ १४ ॥ अनु वृत्तिं ध्रु
वं ते द्य कुर्वंत्यन्यमहीभृताम् ॥ असम्यग्व्यय शीलै
स्तैः कुर्वद्भिः सततं व्ययम् ॥ १५ ॥ संचितः सोति दुःखे
न ह्ययं कोशो गमिष्यति ॥ एत च्चान्य च्च सततं चिंत
यामास पार्थिवः ॥ १६ ॥ तत्र विप्रा श्रमा भ्यासे वैश्य

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

मेकं ददर्श सः ॥ सपृष्टस्तेन कस्त्वं भो हेतुश्चागमनेत्र
कः ॥ १७ ॥ सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्य
से ॥ इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ॥ १८
॥ प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् ॥ १९ ॥ वै
श्य उवाच ॥ २० ॥ समाधिर्नाम वैश्योहमुत्पन्नो ध-
निनां कुले ॥ २१ ॥ पुत्रदारैर्निरस्तश्च धनलोभा
द साधुभिः ॥ विहीनश्च धनैर्दारैः पुत्रैरादाय मेधन

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

म् ॥ २२ ॥ बन मभ्यागतो दुःखी निरस्तश्चाप्त बन्धुभिः
॥ सोहं न वेद्मि पुत्राणां कुशला कुशलात्मिकाम् ॥ २३
॥ प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः ॥ किंनु
तेषां गृहे क्षेम मक्षेमं किंनु सांप्रतम् ॥ २४ ॥ कथंते
किंनु सद्वृत्ता दुर्वृत्ताः किंनु मे सुताः ॥ २५ ॥ राजोवाच
॥ २६ ॥ यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः ॥
२७ ॥ तेषु किं भवतः स्नेह मनुबध्नाति मानसम् ॥ २८

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

॥ वैश्य उवाच ॥ २९ ॥ एवमेतद्यथा प्राह भवानस्म
द्गतं वचः ॥ ३० ॥ किङ्करोमि न बध्नाति मम निष्ठुरतां म-
नः ॥ यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ॥ ३१ ॥
पति स्वजनहार्दं च हार्दितेष्वेव मे मनः ॥ किमेतन्नाभि
जानामि जानन्नपि महामते ॥ ३२ ॥ यत्प्रेमप्रवणं चि-
त्तं विगुणेष्वपि बंधुषु ॥ तेषां कृते मे निःश्वासो दौर्मन
स्यं च जायते ॥ ३३ ॥ करोमि किं यन्न मनस्तेष्वप्रीति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

मुनिसुत्तमम् ॥ ३४ ॥ मार्कण्डेय उवाच ॥ ३५ ॥ ततस्तौ
सहितौ विप्र तं मुनिं समुपस्थितौ ॥ ३६ ॥ समाधिर्नाम
वैश्योऽसौ स च पार्थिव सत्तमः ॥ कृत्वा तु तौ यथा न्यायं
यथार्हं तेन संविदम् ॥ ३७ ॥ उपविष्टौ कथाः काश्चि-
च्चक्रतु वैश्य पार्थिवौ ॥ ३८ ॥ राजोवाच ॥ ३९ ॥ भ-
गवंस्त्वामहं प्रष्टु मिच्छाम्येकं वदस्व तत् ॥ ४० ॥ दुः
खाय यन्मे मनसः स्वचित्ताय त्ततां विना ॥ ममत्वं गत-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

राज्यस्य राज्यांगेष्वखिलेष्वपि ॥ ४१ ॥ जानतोपि
यथाज्ञस्य किमेतन्मुनिसत्तम ॥ अयंच निःकृतः पु-
त्रैर्दारैर्भृत्यैस्तथोज्झितः ॥ ४२ ॥ स्वजनेनच संत्य-
क्तस्तेषु हार्दी तथाप्यति ॥ एवमेष तथाहंच द्वावप्य
त्यंतदुःखितौ ॥ ४३ ॥ दृष्टदोषेपि विषये ममत्वा-
कृष्टमानसौ ॥ तत्केनैतन्महाभाग यन्मोहो ज्ञा-
निनोरपि ॥ ४४ ॥ ममास्यच भवत्येषा विवेकांधस्य १०

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

मूढता ॥ ४५ ॥ ऋषिरुवाच ॥ ४६ ॥ ज्ञानमस्ति स-
मस्तस्य जंतो र्विषयगोचरे ॥ ४७ ॥ विषयश्च महा
भाग याति चैवं पृथक् पृथक् ॥ दिवांधाः प्राणिनः के
चिद्रात्रा वंधा स्तथा परे ॥ ४८ ॥ केचि द्दिवा तथा रा-
त्रौ प्राणिनस्तुल्यदृष्टयः ॥ ज्ञानिनो मनुजाः सत्यं किं
नु ते नहि केवलम् ॥ ४९ ॥ यतो हि ज्ञानिन स्सर्वे पशु
पक्षि मृगा दयः ॥ ज्ञानं च तन्मनुष्याणां यत्तेषां मृगा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

पक्षिणाम् ॥५०॥ मनुष्याणां च यत्तेषां तुल्यमन्यत्तयो
१३ र्भयोः ॥ ज्ञानेऽपि सति पश्यैतान् पतंगाँ छावचंचु
षु ॥ ५१॥ कणमोक्षाहतान्मोहात्पीड्यमानानपि
क्षुधा ॥ मानुषा मनुजव्याघ्र साभिलाषाः सुतान्प्रति
॥ ५२॥ लोभात्प्रत्युपकाराय नन्वेते किन्न पश्यसि
॥ तथापि ममतावर्ते मोहगर्ते निपातिताः ॥ ५३॥ म-
हामायाप्रभावेन संसारस्थितिकारिणाः ॥ तन्नात्र- १३

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

विस्मयः कार्य्यो योग निद्रा जगत्पतेः ॥ ५४ ॥ महा
माया हरेश्चैषा तया संमोह्यते जगत् । ज्ञानिनाम-
पि चेतांसि देवी भगवती हि सा ॥ ५५ ॥ बलादाकृ-
ष्य मोहाय महामाया प्रयच्छति ॥ तया विसृज्यते
विश्वं जगदेतच्चराचरम् ॥ ५६ ॥ सैषा प्रसन्ना वरदा
नृणां भवति मुक्तये ॥ सा विद्या परमा मुक्ते र्हेतु भूता
सनातनी ॥ ५७ ॥ संसार बंध हेतुश्च सैव सर्वेश्वरेश्व

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ति ॥ ५८ ॥ राजोवाच ॥ ५९ ॥ भगवन्का हि सा देवी म-
हामायेति यां भवान् ॥ ६० ॥ ब्रवीति कथमुत्पन्ना सा-
कर्म्मास्याश्च किं द्विज ॥ यत्प्रभावा च सा देवी यत्स्वरू-
पा यदुद्भवा ॥ ६१ ॥ तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्र-
ह्मविदांवर ॥ ६२ ॥ ऋषिरुवाच ॥ ६३ ॥ नित्यैव सा
जगन्मूर्त्तिस्तया सर्वमिदं ततम् ॥ ६४ ॥ तथापि तत्समु-
त्पत्तिर्बहुधा श्रूयतां मम ॥ देवानां कार्य्यसिद्ध्यर्थमावि- १४

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

भवति सा यदा ॥ ६५ ॥ उत्पन्नेति तदा लोके सा नित्या-
प्यभिधीयते ॥ योगनिद्रां यदा विष्णुर्ज्जगत्येकार्णवी-
कृते ॥ ६६ ॥ आस्तीर्य्य शेषमभजत्कल्पान्ते भगवान्प्र-
भुः ॥ तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ॥ ६७ ॥ वि-
ष्णु कर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ॥ सनाभि कमले
विष्णोः स्थितो ब्रह्मा प्रजापतिः ॥ ६८ ॥ दृष्ट्वा तावसुरौ
चोग्रौ प्रसुप्तंच जनार्द्दनम् ॥ तुष्टाव योगनिद्रांतामेकाग्र

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

हृदय स्थितः ॥ ६९ ॥ विबोधनार्थाय हरे हरि नेत्र कृता
लयाम् विश्वेश्वरीं जगद्धात्रीं स्थिति संहार कारिणीम् ॥
७० ॥ निद्रां भगवतीं विष्णो रतुलां तेजसः प्रभुः ॥ ७१ ॥
ब्रह्मोवाच ॥ ७२ ॥ त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरा-
त्मिका ॥ ७३ ॥ सुधा त्व मक्षरे नित्ये त्रिधा मात्रात्मि-
का स्थिता ॥ अर्द्ध मात्रा स्थिता नित्या यानुच्चार्या वि-
शेषतः ॥ ७४ ॥ त्वमेव सा त्वं सावित्री त्वं देवि जननी परा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

॥ त्वयैव धार्यते सर्वं त्वयैतत्सृज्यते जगत् ॥ ७५ ॥ त्वयै
तत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥ विसृष्टौ सृष्टिरू-
पा त्वं स्थिति रूपा च पालने ॥ ७६ ॥ तथा संहृति रूपांते
जगतोऽस्य जगन्मये ॥ महा विद्या महा माया महा मे-
धा महा स्मृतिः ॥ ७७ ॥ महा मोहा च भवती महा देवी
महा सुरी ॥ प्रकृति स्त्वं च सर्वस्य गुण त्रय विभाविनी ॥
॥ ७८ ॥ काल रात्रि र्महा रात्रि र्मोह रात्रिश्च दारुणा ॥ १७

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ ७९ ॥
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च ॥ खड्गिनी
शूलिनी घोरा गदिनी चक्रिणी तथा ॥ ८० ॥ शंखिनी चा-
पिनी बाणा भुशुंडीपरिघायुधा ॥ सौम्या सौम्यतराशेष-
सौम्येभ्यस्त्वतिसुन्दरी ॥ ८१ ॥ परापराणां परमा त्वमेव
परमेश्वरी ॥ यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मि-
के ॥ ८२ ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा १८

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

॥ यथा त्वयाजगत्स्रष्टा जगत्पाता त्तियोजवान् ॥ ८३॥
सोपि निद्रा वशं नीतः कस्त्वां स्तोतु मिहेश्वरः ॥ विष्णुः श-
रीर ग्रहण महमीशान एव च ॥ ८४॥ कारिता स्तेयतोऽ
तस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥ सा त्वमित्थं प्रभा-
वैः स्वैरुदारैर्देवि संस्तुता ॥ ८५॥ मोहयैतौ दुराधर्षावसु-
रौ मधुकैटभौ ॥ प्रबोधं च जगत्स्वामी नीयता मच्युतो लघु-
घु ॥ ८६॥ बोधश्च क्रियता मस्य हंतु मेतौ महासुरौ ॥ ८७ २४

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

॥ ऋषिरुवाच ॥ ८८ ॥ एवं स्तुता तदा देवी तामसी तत्र वे
धसा ॥ ८९ ॥ विष्णोः प्रबोधनार्थाय निहंतुं मधुकैटभौ ॥
नेत्रास्य नासिका बाहु हृदये भ्यस्तथोरसः ॥ ९० ॥ निर्गम्य
दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ॥ उत्तस्थौ च जगन्ना
थस्तया मुक्तो जनार्दनः ॥ ९१ ॥ एकार्णवेऽहि शयनात्ततः
स ददृशे च तौ ॥ मधुकैटभौ दुरात्मानावतिवीर्य्यपराक्र-
मौ ॥ ९२ ॥ क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ॥ ९३
पंञ्च वर्ष सहस्राणि बाहु प्रहरणो विभुः ॥ तावप्यति
बलोन्मत्तौ महा माया विमोहितौ ॥ ९४ ॥ उक्तवन्तौ-
वरोस्मत्तो व्रियता मिति केशवम् ॥ ९५ ॥ भगवानुवाच
॥ ९६ ॥ भवेता मद्य मे तुष्टौ मम वध्या वुभावपि ॥ ९७ ॥
किमन्येन वरेणात्र एता वद्धि वृतं मम ॥ ९८ ॥ ऋषिरु-
वाच ॥ ९९ ॥ वंचिताभ्या मिति तदा सर्व मापो मयंज-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

गत् ॥ १०० ॥ विलोक्य ताभ्यां गदितो भगवान्क-
मले क्षणः ॥ स्त्रावां जहि न यत्रोर्वी सलिलेन प-
रिप्लुता ॥ १०१ ॥ ऋषिरुवाच ॥ १०२ ॥ तथे-
त्युक्त्वा भगवता शंख चक्र गदा भृता ॥ कृत्वा च-
क्रेण वै छिन्ने जघने शिरसी तयोः ॥ १०३ ॥ ए-
व मेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् ॥ प्रभा-
व मस्या देव्यास्तु भूयः शृणु वदामि ते ॥ १०४ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

इति मार्कण्डेय पुराणे सावर्णि के मन्वंतरे देवी
माहात्म्ये मधु कैटभ वधः ॥ १ ॥ ऋषिरुवाच
॥ १ ॥ देवासुर मभूद्युद्धं पूर्ण मब्द शतं पुरा ॥
महिषे सुराणा मधिपे देवानां च पुरंदरे ॥ २ ॥ त-
त्रा सुरै र्महा वीर्यै र्देव सैन्यं परा जितम् ॥ जित्वा
च सकलान् देवा निन्द्रो ऽभून्महिषा सुरः ॥ ३ ॥
ततः पराजिता देवाः पद्म योनिं प्रजापतिम् ॥ पुर २३

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

स्तत्य गता स्तत्र यत्रेश गरुड ध्वजौ ॥ ४ ॥ यथा वृ-
त्त न्तयो स्तद्व न्महिषा सुर चेष्टितम् ॥ त्रिदशाः क-
थया मासु र्देवाभि भव बिस्तरम् ॥ ५ ॥ सूर्य्येंद्राग्न्य
निलें दूनां यमस्य वरुण स्यच ॥ अन्येषां चाधिकारा
न्स स्वय मेवाधि तिष्ठति ॥ ६ ॥ स्वर्गा न्निरा कृता-
स्सर्वे तेन देव गणा भुवि ॥ बिचरंति यथा मर्त्या म-
हिषेण दुरात्मना ॥ ७ ॥ एतद्वः कथितं सर्व ममरारिवि- २४

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

वैरिहितमूर्धारतांच प्रपन्ना स्मो वधस्तस्य विचिंत्यताम्
॥ ८ ॥ इत्थं निशम्य देवानां वचांसि मधुसूदनः ॥ चकार
कोपं शंभुश्च भ्रुकुटी कुटिलाननौ ॥ ९ ॥ ततोति कोप
पूर्णस्य चक्रिणो वदनात्ततः ॥ निश्चक्राम महत्तेजो ब्रह्म-
णः शंकरस्य च ॥ १० ॥ अन्येषां चैव देवानां शक्रादीनां
शरीरतः ॥ निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ॥
११ ॥ अतीव तेजसः कूटं ज्वलंतमिव पर्वतम् ॥ ददृशु २५

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

स्ते सुरा स्तत्र ज्वाला व्याप्त दिगंतरम् ॥१२॥ अतुलं तत्र त
त्तेजः सर्व देव शरीरजम् ॥ एकस्थं तद् भून्नारी व्याप्त लो
कत्रयं त्विषा ॥ १३ ॥ यद् भूच्छांभवं तेजस्तेनाजायत तत्
न्मुखम् ॥ याम्येन चा भवन्केशा बाहवो विष्णुतेजसा ॥
१४ ॥ सौम्येन स्तनयो र्युग्मं मध्यं चैंद्रेण चा भवत् वारु
णेन च जंघोरू नितंब स्तेजसा भुवः ॥ १५ ॥ ब्रह्मण स्तेज
सा पादौ तदंगुल्यो र्कतेजसा ॥ वसूनां च करांगुल्यः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

कौबेरेण च नासिका ॥ १६ ॥ तस्यास्तु दंताःसंभूताः प्राजा
पत्येन तेजसा ॥ नयनत्रितयं जज्ञे तथा पावकतेजसा ॥
१७ ॥ भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च ॥ अ-
न्येषां चैव देवानां संभवस्तेजसां शिवा ॥ १८ ॥ ततस्स-
मस्तदेवानां तेजोराशिसमुद्भवाम् ॥ तांविलोक्य मु-
दम्प्रापुरमरा महिषार्दिताः ॥ १९ ॥ शूलं शूलाद्विनिष्कृ
ष्य ददौ तस्यै पिनाकधृक् ॥ चक्रं च दत्तवान् कृष्णः समु-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

त्यास्य स्वच कृत ॥ २० ॥ शंखं च कलशं प्रशास्ति दध्यै क-
रस्थे कुन्तप्रासं ॥ मारुतो दत्तवाँश्चापं वाणपूर्णेन पेषुधी
॥ २१ ॥ वज्र मिन्द्रः समुत्पाद्य कुलिशा दमराधिपः ॥ द-
दौ तस्यै सहस्राक्षो घंटामैरावता द्गजात् ॥ २२ ॥ काल-
दंडाद्यमो दण्डं पाशं चांबुपति र्ददौ ॥ प्रजापति श्चाक्ष
मालां ददौ ब्रह्मा कमण्डलुम् ॥ २३ ॥ समस्त रोमकूपे
षु निजरश्मीन् दिवाकरः ॥ कालश्च दत्तवान्खड्गंतस्याः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

३० म्बरमेव च निर्म्मलम्॥ क्षीरोदश्चामलं हारमजरे च
२५ तथाम्बरे॥ चूडामणिं तथा दिव्यं कुंडले कटकानि च॥
२५॥ अर्द्धचन्द्रं तथा शुभ्रं केयूरान्सर्वबाहुषु॥ नूपुरौ वि
मलौ तद्वद्ग्रैवेयकमनुत्तमम्॥ २६॥ अंगुलीयकरत्नानि
समस्तास्वंगुलीषु च॥ विश्वकर्म्मा ददौ तस्यै परशुंचा
तिनिर्म्मलम्॥ २७॥ अस्त्राण्यनेकरूपाणि तथाभेद्यंच
दंशनम्॥ अम्लानपंकजां मालां शिरस्युरसि चापराम्॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

॥ २८ ॥ अददज्जलधिस्तस्यै पंकजं चातिशोभनम् ।
हिमवान् वाहनं सिंहं रत्नानि विविधानि च ॥ २९ ॥ दद
वशून्यं सुरया पानपात्रं धनाधिपः ॥ शेषश्च सर्वना
गेशो महामणि विभूषितम् ॥ ३० ॥ नागहारं ददौ त-
स्यै धत्ते यः पृथिवी मिमाम् ॥ अन्यै रपि सुरैर्देवी भूषणै
रायुधैस्तथा ॥ ३१ ॥ सम्मानिता ननादोच्चैः साट्टहासं
मुहुर्मुहुः ॥ तस्या नादेन घोरेण कृत्स्न मापूरितं नभः ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

३२॥ अमायतातिमहता प्रतिशब्दो महानभूत् ॥ चु-
क्षुभुः सकला लोकाः समुद्राश्च चकंपिरे ॥ ३३ ॥ चचाल
वसुधा चेलुः सकलाश्च महीधराः ॥ जयेति देवाश्च मुदा-
तामूचुः सिंहवाहिनीम् ॥ ३४ ॥ तुष्टुवुर्मुनयश्चैनां भक्ति-
नम्रात्ममूर्तयः ॥ दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः
॥ ३५ ॥ सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ॥ आः
किमेतदिति क्रोधादाभाष्य महिषासुरः ॥ ३६ ॥ अभ्यधा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

त तं शब्दमशेषैरसुरैर्वृतः ॥ स ददर्श ततो देवीं व्याप्तलोकत्रयां
त्विषा ॥ ३७ ॥ पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ॥ क्षो-
भिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥ ३८ ॥ दिशो भु-
जसहस्रेण समन्ताद्व्याप्य संस्थिताम् ॥ ततः प्रववृते युद्धं त-
या देव्या सुरद्विषाम् ॥ ३९ ॥ शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदि-
गन्तरम् ॥ महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥ ४० ॥ यु-
युधे चामरश्चान्यैश्चतुरङ्गबलान्वितः ॥ रथानामयुतैः षड्भि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

हृग्राख्यो महासुरः ॥ ४२॥ अयुध्यतायुतानां च सहस्रे-
णा महाहनुः ॥ पंचाशद्भिश्च नियुतैरसिलोमा महासुरः ॥
४३॥ अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ॥ गजवाजि
सहस्रौघैरनेकैः परिवारितः ॥ ४४॥ वृतो रथानां कोट्या च युद्धे
तस्मिन्नयुध्यत ॥ बिडालाख्योऽयुतानां च पंचाशद्भिरथायु
तैः ॥ ४५॥ युयुधे संयुगे तत्र रथानां परिवारितः ॥ अन्ये च तत्रा
युतशो रथनागहयैर्वृताः ॥ ४६॥ युयुधुः संयुगे देव्या सह ३४

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तत्र महासुराः॥ कोटिकोटिसहस्रैस्तु रथानां दंतिनां तथा
॥४६॥ हयानांच वृतोयुद्धे तत्राभून्महिषासुरः॥ तोमरैर्भिं-
दिपालैश्च शक्तिभिर्मुसलैस्तथा॥४७॥ युयुधुःसंयुगे देव्याखड्-
गैः परशुपट्टिशैः॥ केचिच्चचिक्षिपुः शक्तीः केचित्पाशांस्त-
थापरे॥४८॥ देवीं खड्गप्रहारैस्तु ते तां हंतुं प्रचक्रमुः॥सा-
पि देवी ततस्तानि शस्त्राण्यस्त्राणि चंडिका॥४९॥ लील-
यैवप्रचिच्छेद निजशस्त्रास्त्रवर्षिणी॥ अनायस्तानना

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

देवी स्तूयमाना सुरर्षिभिः ॥ ५० ॥ मुमोचासुरदेहेषु श-
स्त्राण्यस्त्राणि चेश्वरी ॥ सोपि क्रुद्धो धुतसटो देव्या वाह
नकेसरी ॥ ५१ ॥ चचारासुरसैन्येषु वनेष्विव हुताशनः
निश्वासान्मुमुचे यांश्च युध्यमाना रणेऽम्बिका ॥ ५२ ॥
त एव सद्यः संभूता गणाः शतसहस्रशः ॥ युयुधुस्ते प-
रशुभिर्भिन्दिपालासिपट्टिशैः ॥ ५३ ॥ नाशयंतोऽसुरग-
णान्देवीशक्त्युपबृंहिताः ॥ अवादयंत पटहान्गणाः श

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

शंखाँस्तथापरे ॥ ५४ ॥ मृदंगांश्च तथैवान्ये तस्मिन्यु-
द्धमहोत्सवे ॥ ततो देवी त्रिशूलेन गदया शक्तिवृष्टि-
भिः ॥ ५५ ॥ खड्गादिभिश्च शतशो निजघान महासुर-
न् ॥ पातयामास चैवान्यान् घंटास्वनविमोहितान् ॥
५६ ॥ असुरान् भुवि पाशेन बध्वा चान्यानकर्षयत् ॥
केचिद्द्विधा कृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥ ५७ ॥ वि-
पोथिता निपातेन गदया भुवि शेरते ॥ वेमुश्च केचिद्रु-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

निःसुसलेन भूयो हताः ॥ ५८ ॥ केचिन्निपतिता भूमौ
भिन्नाः शूलेन वक्षसि ॥ निकृंतिताः खङ्गधारेण हताः केचिद्र
णाजिरे ॥ ५९ ॥ सेनानुकारिणः प्राणान्मुमुचुस्त्रिदशा-
र्दिताः ॥ केषांचिद्वाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ॥ ६०
॥ शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ॥ विच्छिन्न
जंघास्त्वपरे पेतुरुर्व्यां महासुराः ॥ ६१ ॥ एकबाहुक्षिच
रणाः केचिद्देव्या द्विधा कृताः ॥ छिन्नेपि चान्ये शिरसि प- ३७

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ता:पुनरुत्थिताः ॥ ६२ ॥ कबंधा युद्धे व्यागृहीत पर-
सुधाः ॥ ननृतुश्चापरे तत्र युद्धे तूर्य लयाश्रिताः ॥ ६३ ॥
कबंधाश्छिन्नशिरसः खड्ग शक्त्यृष्टि पाणयः ॥ तिष्ठतिष्ठति
भाषंतो देवी मन्ये महासुराः ॥ ६४ ॥ पातितै रथ नागाश्वै
सुरैश्च वसुंधरा ॥ अगम्या साभवत्तत्र यत्राभूत्स महारणः
॥ ६५ ॥ शोणितौघा महानद्यस्सद्यस्तत्र विसुस्रुवुः ॥ म-
ध्ये चासुर सैन्यस्य वारणासुरवाजिनाम् ॥ ६६ ॥ क्षणेन त- ३८

CC-0. In Public Domain. Funding by IKS-MoE

न्महासैन्यमसुराणां तथाम्बिका ॥ निन्ये क्षयं यथा वह्नि-
स्तृणदारुमहाचयम् ॥ ६७ ॥ स च सिंहो महानादमुत्सृ-
जन्धुतकेसरः ॥ शरीरेभ्योऽमरारीणामसूनिव विचि-
न्वति ॥ ६८ ॥ देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः ॥ य-
थैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि ॥ ६९ ॥ इति
मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महि-
षासुरसैन्यवधः ॥ २ ॥ ऋषिरुवाच ॥ १ ॥ निहन्यमा

Digitized by eGangotri
CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

नं तत्सैन्यमवलोक्य महासुरः ॥ सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम् ॥ २ ॥ स देवीं शरवर्षेण ववर्ष समरेऽसुरः ॥ यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः ॥ ३ ॥ तस्य छित्त्वा ततो देवी लीलयैव शरोत्करान् ॥ जघान तुरगान् बाणैर्यन्तारं चैव वाजिनाम् ॥ ४ ॥ चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् ॥ विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ॥ ५ ॥ सच्छिन्नधन्वा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

विरथो हताश्वो हतसारथिः ॥ अभ्यधावत तां देवीं खड्ग
चर्मधरोऽसुरः ॥ ६ ॥ सिंहमाहत्य खड्गेन तीक्ष्णधारेण
मूर्द्धनि ॥ आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥
७ ॥ तस्याः खड्गो भुजं प्राप्य पफाल नृपनंदन ॥ ततो ज-
ग्राह शूलं स कोपादरुणलोचनः ॥ ८ ॥ चिक्षेप च तत
स्तत्तु भद्रकाल्यां महासुरः ॥ जाज्वल्यमानं तेजोभी र-
विबिंबमिवांबरात् ॥ ९ ॥ दृष्ट्वा तदापतच्छूलं देवी शू-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

लममुंचत ॥ तच्छूलं शतधा तेन नीतं स च महासुरः ॥
१०॥ हते तस्मिन्महावीर्ये महिषस्य चमूपतौ ॥ आज-
गाम गजारूढश्चामरस्त्रिदशार्दनः ॥ ११॥ सोऽपि शक्तिं
मुमोचाथ देव्यास्तामम्बिका द्रुतम् ॥ हुंकाराभिहतां भूमौ पा-
तयामास निःप्रभाम् ॥ १२ ॥ भग्नां शक्तिं निपतितां दृष्ट्वा
क्रोधसमन्वितः ॥ चिक्षेप चामरः शूलं बाणैस्तदपि सा-
च्छिनत् ॥ १३ ॥ ततसिंहस्समुत्पत्य गजकुम्भान्तरस्थि-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तः ॥ बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥ २४ ॥ यु-
ध्यमानौ ततस्तौ तु तस्मात्स्थानान्महीं गतौ ॥ युयुधाते-
तिसंरब्धौ प्रहारैरतिदारुणैः ॥ २५ ॥ ततो वेगात्खमुत्प-
त्य निपत्य च मृगारिणा ॥ कर प्रहारेण शिरश्चामरस्य
पृथक् कृतम् ॥ २६ ॥ उदग्रश्च रणे देव्या शिलावृक्षादि
भिर्हतः ॥ दंतमुष्टितलैश्चैव करालश्च निपातितः ॥ २७
॥ देवी क्रुद्धा गदापाते श्चूर्णया मास चोद्धतम् ॥ बाष्क 43

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

त्वं भिंदि पालेन वारौ स्तास्त्रं तथांधकम्॥ १८ ॥ उग्रास्य
मुग्र वीर्यञ्च तथैवच महा हनुम्॥ त्रिनेत्राच त्रिशूलेन ज-
घान परमेश्वरी ॥ १९॥ विडालस्या सिना कायात्पातया
मास वैशिरः ॥ दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षय-
म् ॥ २०॥ एवं संक्षीय माणेतु स्वसैन्ये महिषा सुरः॥ मा
हिषेण स्वरूपेण त्रासया मास तान्गणान् ॥ २१॥ कां
श्चित्तुंड प्रहारेण खुरक्षेपै स्तथा परान् ॥ लांगूल ताडितां

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

श्चान्यान् शृंगाभ्यां च विदारितान् ॥ २२ ॥ वेगेन कां-
श्चिद परान्नादेन भ्रमणेन च ॥ निश्वासपवनेनान्या
न्पातयामास भूतले ॥ २३ ॥ निपात्य प्रमथानीकम-
भ्यधावत सोऽसुरः ॥ सिंहं हन्तुं महादेव्याः कोपं चक्रे त-
तोऽम्बिका ॥ २४ ॥ सोऽपि कोपान्महावीर्यः खुरक्षुण्ण
महीतलः ॥ शृंगाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च
॥ २५ ॥ वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

दु० तं भिंदिपालेन बाणैस्ताम्रं तथांधकम्॥१८॥ उग्रास्य
मुग्रवीर्यञ्च तथैव च महाहनुम्॥ त्रिनेत्रा च त्रिशूलेन ज-
घान परमेश्वरी॥ १९॥ बिडालस्यासिना कायात्पातया
मास वै शिरः॥ दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षय-
म्॥ २०॥ एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः॥ मा
हिषेण स्वरूपेण त्रासयामास तान् गणान्॥ २१॥ कां
श्चित्तुंडप्रहारेण खुरक्षेपैस्तथापरान्॥ लांगूलताडितां

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

स्थान्यान् शृंगाभ्यां च विदारितान् ॥ २२ ॥ वेगेन कां-
श्चिद परान्नादेन भ्रमणेन च ॥ निश्वासपवनेनान्या
न्पातयामास भूतले ॥ २३ ॥ निपात्य प्रमथानीकम-
भ्यधावत सोऽसुरः ॥ सिंहं हन्तुं महादेव्याः कोपं चक्रे त-
तोऽम्बिका ॥ २४ ॥ सोऽपि कोपान्महावीर्यः खुरक्षुण्ण
महीतलः ॥ शृंगाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च
॥ २५ ॥ वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ॥

CC-0. In Public Domain. Funding by IKS-MoE

लं भिंदिपालेन बाणैस्ताम्रं तथांधकम्॥१८॥ उग्रास्य
मुग्रवीर्यञ्च तथैव च महाहनुम्॥ त्रिनेत्रा च त्रिशूलेन ज-
घान परमेश्वरी॥ १९॥ विडालस्यासिना कायात्पातया
मास वै शिरः॥ दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षय-
म्॥ २०॥ एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः॥ मा
हिषेण स्वरूपेण त्रासयामास तान्गणान्॥ २१॥ कां
श्चित्तुंडप्रहारेण खुरक्षेपैस्तथापरान्॥ लांगूलताडितां

Digitized by eGangotri

श्चान्यान् शृंगाभ्यां च विदारितान् ॥ २२ ॥ वेगेन कां-
श्चिद् परान्नादेन भ्रमणेन च ॥ निश्वासपवनेनान्या
न्पातयामास भूतले ॥ २३ ॥ निपात्य प्रमथानीकम-
भ्यधावत सोऽसुरः ॥ सिंहं हन्तुं महादैत्यः कोपं चक्रे त-
तोऽम्बिका ॥ २४ ॥ सोऽपि कोपान्महावीर्यः खुरक्षुण्ण
महीतलः ॥ शृंगाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च
॥ २५ ॥ वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ॥ ५५

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ङ्गूलेना हतश्चाब्धिः प्लावयामास सर्वतः ॥ २६॥ धुतशृं
विभिन्नाश्च खंडं खंडं ययुर्घनाः ॥ श्वासानिलास्ताः
तशो निपेतुर्नभसोऽचलाः ॥ २७॥ इति क्रोधसमाध्मा
त मापतंतं महासुरम् ॥ दृष्ट्वा सा चंडिका कोपं तद्वधाय
तदा करोत् ॥ २८॥ सा क्षिप्त्वा तस्य वै पाशं तं बबंध महासु
रम् ॥ तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥ २९॥
ततस्सिंहोऽभवत्सद्यो यावत्तस्यांबिका शिरः ॥ छिनत्ति ४९

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तावत्पुरुषः खड्गपाणि रदृश्यत ॥ ३०॥ तत एवाशु पुरुषं दे-
वी चिच्छेद सायकैः ॥ तं खड्गचर्मणा सार्द्धं ततः सोऽभून्म-
हागजः ॥ ३१ ॥ करेण च महासिंहं तं चकर्ष जगर्ज च ॥
कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥ ३२ ॥ ततो महासु-
रो भूयो माहिषं वपुरास्थितः ॥ तथैव क्षोभयामास त्रैलो-
क्यं सचराचरम् ॥ ३३ ॥ ततः क्रुद्धा जगन्माता चंडिका पान
मुत्तमम् ॥ पपौ पुनः पुनश्चैव जहासारुणलोचना ॥ ३४ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ननर्द्द चासुरः सोऽपि वलवीर्यमदोद्धतः ॥ विषाणाभ्यां च
चिक्षेप चंडिकां प्रति भूधरान् ॥ ३५ ॥ सा च तान् प्रहितांस्ते
न चूर्णयंती शरोत्करैः ॥ उवाच तं मदोद्धूतमुखरागाकुला
क्षरम् ॥ ३६ ॥ देव्युवाच ॥ ३७ ॥ गर्ज्ज गर्ज्ज क्षणं मूढ मधु-
यावत्पिवाम्यहम् ॥ मया त्वयि हतेत्रैव गर्ज्जिष्यंत्याशु दे-
वताः ॥ ३८ ॥ ऋषिरुवाच ॥ ३९ ॥ एवमुक्त्वा समुत्पत्य सारूढा त
म्महासुरम् ॥ पादेनाक्रम्य कंठे च शूलेनैनमताडयत् ॥ ४० ॥

CC-0. In Public Domain. Funding by IKS-MoE

ततस्सोऽपि पदाक्रांतस्तया निजमुखात्ततः ॥ अर्द्धनिष्क्रान्त
एवासिदेव्या वीर्येण संवृतः ॥ ४१ ॥ अर्द्धनिष्क्रान्त एवासौयु
ध्यमानो महासुरः ॥ तया महासिना देव्या शिरःछित्वानि-
पातितः ॥ ४२ ॥ ततो हाहाकृतं सर्वं दैत्य सैन्यं ननाश तत् ॥
प्रहर्षंच परं जग्मुः सकला देवतागणाः ॥ ४३ ॥ तुष्टुवुस्तां-
सुरा देवीं सह दिव्यै र्महर्षिभिः ॥ जगुर्गंधर्वपतयो ननृतुश्चा-
प्सरोगणाः ॥ ४४ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वं ४९

Digitized by eGangotri
CC-0. In Public Domain. Funding by IKS-MoE

तरे देवीमाहात्म्ये महिषासुरवधः तृतीयोऽध्यायः ॥ ३ ॥ ऋ-
षिरुवाच ॥ १ ॥ शक्रादयः सुरगणा निहतेऽतिवीर्ये तस्मिन्दु
रात्मनि सुरारिबले च देव्या । तां तुष्टुवुः प्रणतिनम्रशिरोधरां
सा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥ २ ॥ देव्या यया तत-
मिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां भक्त्या नताः स्म विदधा-
तु शुभानि सा नः ॥ ३ ॥ यस्याः प्रभावमतुलं भगवाननन्तो- ५०

Digitized by eGangotri

ब्रह्माहरश्चनहिवक्तुमलंबलंच॥ साचंडिकाखिलजगत्परिपा-
लनायनाशायचाशुभभयस्यमतिंकरोतु॥ ४॥ याश्रीःस्व
यंसुकृतिनांभवनेष्वलक्ष्मीःपापात्मनांकृतधियांहृदये-
षुबुद्धिः॥ श्रद्धासतांकुलजनप्रभवस्यलज्जातांत्वांनताः
स्मपरिपालयदेविविश्वम्॥ ५॥ किंवर्णयामतवरूपमचिं
त्यमेतत्किंचातिवीर्य्यमसुरक्षयकारिभूरि॥ किंचाहवेषु
चरितानितवाद्भुतानिसर्वेषुदेव्यसुरदेवगणादिकेषु॥ ६॥ ५२

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

हेतुः समस्तजगतां त्रिगुणापि दोषैर्न्न ज्ञायसे हरिहरादिभि
रप्यपारा ॥ सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि
परमा प्रकृतिस्त्वमाद्या ॥ ७ ॥ यस्याः समस्तसुरता समुदीर
णेन तृप्तिं प्रयाति सकलेषु मखेषु देवि ॥ स्वाहासि वै पितृग
णस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्वधा च ॥ ८ ॥
या मुक्तिहेतुरविचिन्त्यमहाव्रता च अभ्यस्यसे सुनियतेन्द्रि
यतत्त्वसारैः ॥ मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्वि— ५२

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

द्यासि सा भगवती परमा हि देवि ॥ ९ ॥ शब्दात्मिका सुवि
मलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नाम्
॥ देवी त्रयी भगवती भवभावनाय वार्ता च सर्वजगतां पर
मार्तिहन्त्री ॥ १० ॥ मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसंगा ॥ श्रीः कैटभारिहृदयैककृ
ताधिवासा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ ११ ॥
ईषत्सहासममलं परिपूर्णचंद्रबिंबानुकारि कनकोत्तम

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

कांतिकान्तम् ॥ अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं वि-
लोक्य सहसा महिषासुरेण ॥ १२ ॥ दृष्ट्वा तु देवि कुपितं भ्रु-
कुटीकरालमुद्यच्छशांकसदृशच्छवि यन्न सद्यः ॥ प्राणा-
न्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितांतक-
दर्शनेन ॥ १३ ॥ देवि प्रसीद परमा भवती भवाय सद्यो वि-
नाशयसि कोपवती कुलानि ॥ विज्ञातमेतदधुनैव यद-
स्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य ॥ १४ ॥ ते सम- ५४

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति धर्म्म-
वर्गः॥ धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदा-
भ्युदयदा भवती प्रसन्ना ॥ १५ ॥ धर्म्याणि देवि सकला-
नि सदैव कर्म्माण्यत्यादृतः प्रतिदिनं सुकृती करोति ॥
स्वर्गं प्रयाति च ततो भवती प्रसादाल्लोकत्रयेपि फल-
दा ननु देवि तेन ॥ १६ ॥ दुर्गे स्मृता हरसि भीतिमशेषजं-
तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि॥ दारिद्र्यदुः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ख भय हारिणि का त्व दन्या सर्वो पकार कर णाय सदार्द्र
चित्ता ॥ १७ ॥ एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वंतु-
नाम नरकाय चिराय पापम् ॥ संग्राम मृत्यु मधिगम्य दि-
वं प्रयांतु मत्वेति नूनमहितान्विनिहंसि देवि ॥ १८ ॥ दृष्ट्वै
व किं न भवती प्रकरोति भस्म सर्वा सुरानरिषु यत्प्रहिणो
षि शस्त्र म् ॥ लोकान्प्रयांतु रिपवोपि हि शस्त्र पूता इत्थं
मतिर्भवति तेष्वपि तेति साध्वी ॥ १९ ॥ खड्ग प्रभानिकर

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

विस्फुरणैस्तथोग्रैः शूलाग्रकांतिनिवहेन दृशोऽसुराणाम्
यन्नागता विलयमंशुमदिंदुखंडयोग्याननं तववि-
लोकयतां तदेतत् ॥ २० ॥ दुर्वृत्तवृत्तशमनं तव देवशी
लं रूपं तथैतदविचिंत्यमतुल्यमन्यैः ॥ वीर्यं च हंतृहत
देवपराक्रमाणां वैरिष्वपि प्रकटितैव दयात्वयेत्थम् ॥
२१ ॥ केनोपमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभय
कार्यतिहारि कुत्र ॥ चित्ते कृपा समरनिष्ठुरता च दृष्टा

CC-0. In Public Domain. Funding by IKS-MoE

त्वयेव देवि वरदे भुवनत्रयेपि ॥ २२॥ त्रैलोक्यमेतदखि-
लंरिपुनाशनेन त्रातंत्वयासमर मूर्द्धनि तेपि हत्वा ॥ नी-
तादिवं रिपुगणा भयमप्यपास्त मस्माकमुन्मद सुरारि
भवंनमस्ते ॥ २३॥ शूलेनपाहिनो देवि पाहि खड्गेन चा-
म्बिके ॥ घंटास्वनेन नः पाहि चापज्यानिस्वनेनच ॥
२४॥ प्राच्यांरक्ष प्रतीच्यांच चण्डिके रक्ष दक्षिणे ॥ भ्रा-
मणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ २५॥ सौम्यानि ९

Digitized by eGangotri
CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

यानि रूपाणि त्रैलोक्ये विचरंति ते ॥ यानि चात्यर्थ घोरा-
णि तै रक्षास्मांस्तथा भुवम् ॥ २६ ॥ खड्गशूलगदादीनि
यानि चास्त्राणि तेंऽबिके ॥ करपल्लवसंगीनि तैरस्मान्
रक्ष सर्वतः ॥ २७ ॥ ऋषिरुवाच ॥ २८ ॥ एवं स्तुता सुरै-
र्दिव्यैः कुसुमैर्नंदनोद्भवैः ॥ अर्चिता जगतां धात्री तथा
गंधानुलेपनैः ॥ २९ ॥ भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु
धूपिता ॥ प्राह प्रसादसुमुखी समस्तान्प्रणतान्सुरान् ॥ ५२

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

३०॥ देव्युवाच ॥ ३१॥ व्रियतां त्रिदशाः सर्वे यदस्मत्तो
भि वाञ्छितम्॥ ३२॥ देवा ऊचुः ॥ ३३॥ भगवत्या कृतं स-
र्वन्न किञ्चिदव शिष्यते ॥ ३४॥ यदयं निहतः शत्रु
रस्माकं महिषासुरः॥ यदि चापि वरो देय स्त्वयास्मा-
कं महेश्वरि॥ ३५॥ संस्मृता संस्मृता त्वं नो हिंसेथाः पर
मापदः॥ यश्च मर्त्यस्स्तवैरेभि स्त्वां स्तोष्य त्यमलानने
॥ ३६॥ तस्य वित्तर्द्धि विभवै र्धनदारादि संपदाम्॥ वृ- ६०

CC-0. In Public Domain. Funding by IKS-MoE

द्धयेस्मत्प्रसन्ना त्वं भवेथाः सर्वदांबिके ॥ ३७॥ ऋषि-
रुवाच ॥ ३८ ॥ इति प्रसादिता देवैर्जगतोऽर्थे तथात्मनः
॥ तथेत्युक्त्वा भद्रकाली बभूवांतर्हिता नृप ॥ ३९ ॥ इ-
त्येतत्कथितं भूप संभूता सा यथा पुरा ॥ देवी देवशरीरे-
भ्यो जगत्त्रयहितैषिणी ॥ ४० ॥ पुनश्च गौरीदेहात्सा स-
मुद्भूता यथा भवत् ॥ वधाय दुष्टदैत्यानां तथा शुंभनिशु-
भयोः ॥ ४१ ॥ रक्षणाय च लोकानां देवानामुपकारिणी ६१

Digitized by eGangotri
CC-0. In Public Domain. Funding by IKS-MoE

॥ तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ॥ ३५ ॥
इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
शक्रादिस्तुतिः ॥ ४ ॥ ऋषिरुवाच ॥ १ ॥ पुरा शुम्भनि-
शुम्भाभ्यामसुराभ्यां शचीपतेः ॥ त्रैलोक्यं यज्ञभागाश्च
हृता मदबलाश्रयात् ॥ २ ॥ तावेव सूर्यतां तद्वदधिकारं
तथैन्दवम् ॥ कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥ ३
॥ तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ॥ ततो देवा वि- ६२

Digitized by eGangotri

निर्द्धूता भ्रष्ट राज्याः परा जिताः ॥ ४ ॥ हृताधिकारास्त्रि-
दशास्ताभ्यां सर्वे निराकृताः ॥ महासुराभ्यां तां देवीं संस्म
रंत्यपराजितामू ॥ ५ ॥ तयास्माकं वरो दत्तो यथापत्सु-
स्मृताखिलाः ॥ भवतां नाशयिष्यामि तत्क्षणात्परमाप
दः ॥ ६ ॥ इति कृत्वा मतिं देवा हिमवंतं नगेश्वरम् ॥ जग्मु
स्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥ ७ ॥ देवा ऊचुः ॥ ८
॥ नमो देव्यै महादेव्यै शिवायै सततं नमः ॥ नमः प्रकृत्यै भद्रा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

भद्रायै नियताः प्रणताः स्मताम् ॥ ९ ॥ रौद्रायै नमो नित्या-
यै गौर्यै धात्र्यै नमो नमः ॥ ज्योत्स्नायै चेन्दुरूपिण्यै सुखा
यै सततं नमः ॥ १० ॥ कल्याण्यै प्रणता वृद्ध्यै सिद्ध्यै कुर्म्मो
नमो नमः ॥ नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥
११ ॥ दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ॥ ख्यात्यै तथै
व कृष्णायै धूम्रायै सततं नमः ॥ १२ ॥ अतिसौम्यातिरौद्रायै
नतास्तस्यै नमो नमः ॥ नमो जगत्प्रतिष्ठायै देव्यै कृत्यै न-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

मोनमः ॥ १३ ॥ या देवी सर्व भूतेषु विष्णु मायेति शब्दिता
॥ नमस्तस्यै ॥ १४ ॥ नमस्तस्यै ॥ १५ ॥ नमस्तस्यै नमोनमः
॥ १६ ॥ या देवी सर्व भूतेषु चेतनेत्य भिधीयते ॥ नमस्तस्यै
॥ १७ ॥ नमस्तस्यै ॥ १८ ॥ नमस्तस्यै नमोनमः ॥ १९ ॥
या देवी सर्व भूतेषु बुद्धि रूपेण संस्थिता ॥ नमस्तस्यै ॥ २०
॥ नमस्तस्यै ॥ २१ ॥ नमस्तस्यै नमोनमः ॥ २२ ॥ या देवी
सर्व भूतेषु निद्रा रूपेण संस्थिता ॥ नमस्तस्यै ॥ २३ ॥ न-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

मत्तस्यै ॥ २४ ॥ नमस्तस्यै नमो नमः ॥ २५ ॥ या देवी सर्व
भूतेषु क्षुधा रूपेण संस्थिता ॥ नमस्तस्यै ॥ २६ ॥ नमस्त
स्यै ॥ २७ ॥ नमस्तस्यै नमो नमः ॥ २८ ॥ या देवी सर्वभू-
तेषु छाया रूपेण संस्थिता ॥ नमस्तस्यै ॥ २९ ॥ नमस्त-
स्यै ॥ ३० ॥ नमस्तस्यै नमो नमः ॥ ३१ ॥ या देवी सर्वभूते
षु शक्ति रूपेण संस्थिता ॥ नमस्तस्यै ॥ ३२ ॥ नमस्तस्यै ॥
३३ ॥ नमस्तस्यै नमो नमः ॥ ३४ ॥ या देवी सर्वभूतेषु तृ- ६६

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

रूपेणसंस्थिता ॥ नमस्तस्यै ॥ ३५ ॥ नमस्तस्यै ॥ ३६ ॥ नमस्तस्यै नमोनमः ॥ ३७ ॥ या देवी सर्वभूतेषु शांति रूपेण संस्थिता ॥ नमस्तस्यै ॥ ३८ ॥ नमस्तस्यै ॥ ३९ ॥ नमस्तस्यै नमोनमः ॥ ४० ॥ या देवी सर्वभूतेषु जाति रूपेण संस्थिता ॥ नमस्तस्यै ॥ ४१ ॥ नमस्तस्यै ॥ ४२ ॥ नमस्तस्यै नमोनमः ॥ ४३ ॥ या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ॥ नमस्तस्यै ॥ ४४ ॥ नमस्तस्यै ॥ ४५ ॥ नमस्तस्यै नमो- ६७

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

नमः ॥ ४६ ॥ या देवी सर्वभूतेषु शांतिरूपेण संस्थिता ॥ न
मस्तस्यै ॥ ४७ ॥ नमस्तस्यै ॥ ४८ ॥ नमस्तस्यैनमोनमः
॥ ४९ ॥ या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता नमस्तस्यै
॥ ५० ॥ नमस्तस्यै ॥ ५१ ॥ नमस्तस्यैनमोनमः ॥ ५२ ॥
या देवी सर्वभूतेषु कांतिरूपेण संस्थिता ॥ नमस्तस्यै ॥
५३ ॥ नमस्तस्यै ॥ ५४ ॥ नमस्तस्यैनमोनमः ॥ ५५ ॥
या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता नमस्तस्यै ॥ ६८

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

॥ ५६ ॥ नमस्तस्यै ॥ ५७ ॥ नमस्तस्यैनमोनमः॥ ५८ ॥ यादे-
वी सर्वभूतेषु रतिरूपेण संस्थिता नमस्तस्यै ॥ ५९ ॥ नम-
स्तस्यै ॥ ६० ॥ नमस्तस्यैनमोनमः ॥ ६१॥ यादेवी सर्वभू-
तेषु स्मृतिरूपेण संस्थिता नमस्तस्यै ॥ ६२ ॥ नमस्तस्यै ॥
६३ ॥ नमस्तस्यैनमोनमः ॥ ६४ ॥ या देवी सर्वभूतेषु दया
रूपेण संस्थिता नमस्तस्यै ॥ ६५ ॥ नमस्तस्यै ॥ ६६ ॥ नम
स्तस्यैनमोनमः ॥ ६७ ॥ यादेवी सर्वभूतेषु तुष्टिरूपेण सं- ६९

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

स्थितानमस्तस्यै ॥ ६८ ॥ नमस्तस्यै ॥ ६९ ॥ नमस्तस्यैन-
मोनमः ॥ ७० ॥ यादेवी सर्वभूतेषु मातृरूपेण संस्थिता
नमस्तस्यै ॥ ७१ ॥ नमस्तस्यै ॥ ७२ ॥ नमस्तस्यैनमोनमः
॥ ७३ ॥ यादेवी सर्वभूतेषु भ्रांतिरूपेण संस्थिता नमस्त
स्यै ॥ ७४ ॥ नमस्तस्यै ॥ ७५ ॥ नमस्तस्यैनमोनमः ॥ ७६
॥ इंद्रियाणामधिष्ठात्री भूतानां चाखिलेषुया ॥ भूतेषु
सततंतस्यैव्याप्तिदेव्यैनमोनमः ॥ ७७ ॥ चितिरूपेणया

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

त्स्नमेतद्व्याप्य स्थिता जगत् नमस्तस्यै ॥७८॥ नमस्त
स्यै ॥ ७९॥ नमस्तस्यै नमोनमः ॥ ८०॥ स्तुता सुरैः पूर्व
मभीष्टसंश्रयात्तथा सुरेन्द्रेण दिनेषु सेविता ॥ करोतु सा
नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः ॥
८१॥ या सांप्रतं चोद्धत दैत्य तापितैरस्माभिरीशा च सुरै
र्नमस्यते ॥ याच स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्ति
विनम्र मूर्तिभिः ॥ ८२॥ ऋषिरुवाच॥ ८३॥ एवंस्तवादियुक्ता

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

नां देवानां तत्र पार्वती ॥ स्नातुमभ्याययौ तोये जान्हव्या
नृपनंदन ॥ ८४ ॥ साब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिः स्तू-
यतेऽत्र का ॥ शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छि-
वा ॥ ८५ ॥ स्तोत्रं ममैतत् क्रियते शुंभदैत्यनिराकृतैः ॥
देवैः समस्तैः समरे निशुंभेन पराजितैः ॥ ८६ ॥ शरीर-
कोशाद्यत्तस्याः पार्वत्या निःसृतांबिका ॥ कौशिकीति
समस्तेषु ततो लोकेषु गीयते ॥ ८७ ॥ तस्यां विनिर्ग-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तां यांतु कृत्वा भृत्साऽपि पार्वती ॥ कालकेति समाख्याता हिमाचलकृताश्रया ॥ ८८ ॥ ततोंऽबिकां परं रूपं बिभ्राणां सुमनोहरम् ॥ ददर्श चंडो मुंडश्च भृत्यौ शुंभनिशुंभयोः ॥ ८९ ॥ ताभ्यां शुंभाय चाख्याता अतीव सुमनोहरा ॥ काप्यास्ते स्त्री महाराज भासयंती हिमाचलम् ॥ ९० ॥ नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमं ॥ ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ॥ ९१ ॥ स्त्रीरत्नमति- ७८

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

चार्वं गी द्योतयंती दिश स्त्विषा ॥ सातु तिष्ठति दैत्येंद्र
तां भवान्द्रष्टुमर्हति ॥ ८२ ॥ यानि रत्नानि मणयो मा
जाश्वादीनि वै प्रभो ॥ त्रैलोक्ये तु समस्तानि सांप्रतं भां
ति ते गृहे ॥ ८३ ॥ ऐरावतः समानीतो गजरत्नं पुरंद
रात् ॥ पारिजाततरुश्चायं तथैवोच्चैः श्रवा हयः ॥ ८४
॥ विमानं हंससंयुक्तमेतत्तिष्ठति तेंगणे ॥ रत्नभूतमि
हानीतं यदासीद्वेधसोऽद्भुतम् ॥ ८५ ॥ निधिरेषमहा ७४

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

पद्मः समानीतो धनेश्वरात् ॥ किंजल्किनौ ददौ चा-
ब्धिर्माला मम्लान पंकजाम् ॥ ५६ ॥ छत्रं ते वारुणं गे-
हे कांचन स्रावि तिष्ठति ॥ तथायं स्यन्दन वरो यः पुरा-
सीत्प्रजापतेः ॥ ५७ ॥ मृत्यो रुत्क्रांतिदा नाम शक्तिरी-
शत्वया हृता ॥ पाशः सलिल राजस्य भ्रातुस्तव परिग्र-
हे ॥ ५८ ॥ निशुंभस्याब्धि जाताश्च समस्ता रत्नजात-
यः ॥ वन्हि रपि ददौ तुभ्य मग्नि शौचेच्च वाससी ॥ ५९ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

॥ एवं दैत्येंद्र रत्नानि समस्तान्याहृतानि ते ॥ स्त्रीरत्नमे-
षा कल्याणी त्वया कस्मान्न गृह्यते ॥ १०० ॥ ऋषिरुवा-
च ॥ १०१ ॥ निशम्येति वचः शुंभः स तदा चंडमुंडयोः
॥ प्रेषयामास सुग्रीवं दूतं देव्या महासुरम् ॥ १०२ ॥ इति
चेति च वक्तव्या सा गत्वा वचनान्मम ॥ यथा चाभ्येति
संप्रीत्या तथा कार्य्यं त्वया लघु ॥ १०३ ॥ स तत्र गत्वा य-
त्रास्ते शैलोद्देशेऽतिशोभने ॥ तां च देवी ततः प्राह श्ल- ७६

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

श्रां मधुरया गिरा ॥ १०४ ॥ दूत उवाच ॥ १०५ ॥ देवि दै
त्येश्वरः शुंभ स्त्रैलोक्ये परमेश्वरः ॥ दूतोऽहं प्रेषितस्ते
न त्वत्सकाश मिहागतः ॥ १०६ ॥ अव्याहताज्ञस्सर्वा
सु यस्सदा देवयोनिषु ॥ निर्ज्जिताखिल दैत्यारिः स य-
दाह शृणुष्व तत् ॥ १०७ ॥ मम त्रैलोक्य मखिलं मम दे
वा वशानुगाः ॥ यज्ञ भागानहं सर्वानु पाश्नामि पृथक्
पृथक् ॥ १०८ ॥ त्रैलोक्ये वर रत्नानि मम वश्यान्य शे- ६७

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

यतः ॥ तथैव गजरत्नानि हृत्वा देवेंद्र वाहनम् ॥ २०९
क्षीरोद मथनोद्भूत मश्वरत्नं ममामरैः ॥ उच्चैश्श्रवस
सञ्ज्ञत तत्प्रणिपत्य समर्पितम् ॥ २१० ॥ यानि चान्या
नि देवेषु गंधर्वेषूरगेषु च ॥ रत्नभूतानि भूतानि ता
नि मय्येव शोभने ॥ २११ ॥ स्त्रीरत्नभूतां त्वां देवि लो
के मन्यामहे वयम् ॥ सा त्वमस्मानुपागच्छ यतो र
त्नभुजो वयम् ॥ २१२ ॥ मां वा ममानुजं वापि निशुं- ७८

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

म सुरविक्रमम् ॥ अजलंचंचला पांगि रत्नभूतासि-
वि यतः ॥ ११३ ॥ परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहा
त् ॥ एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥ ११४
॥ ऋषिरुवाच ॥ ११५ ॥ इत्युक्ता सा तदा देवी गंभीरां
तः स्मिता जगौ ॥ दुर्गा भगवती भद्रा ययेदं धार्यते जग-
त् ॥ ११६ ॥ देव्युवाच ॥ ११७ ॥ सत्यमुक्तं त्वया ना-
त्र मिथ्या किंचित्त्वयोदितम् ॥ त्रैलोक्याधिपतिः शुंभो ७९

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

निशुंभश्चापितादृशः ॥ ११८ ॥ किंत्वत्र यत्प्रतिज्ञातं-
मिथ्यातत्क्रियते कथम् ॥ श्रूयतामल्पबुद्धित्वात्प्रति
ज्ञाया कृता पुरा ॥ ११९ ॥ योमांजयति संग्रामे योमे
दर्पंव्यपोहति ॥ योमे प्रतिबलो लोके समे भर्ताभ-
विष्यति ॥ १२० ॥ तदागच्छतु शुंभोत्र निशुंभो वा-
महासुरः ॥ मांजित्वा किंचिरेणात्र पाणिंगृह्णातु मे-
लघु ॥ १२१ ॥ दूतउवाच ॥ १२२ ॥ अवलिप्तासि मै-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

र्मं त्वं देवि ब्रूहि ममागतः ॥ त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे
शुंभनिशुंभयोः ॥ १२३ ॥ अन्येषामपि दैत्यानां सर्वे
देवा न वै युधि ॥ तिष्ठंति संमुखे देवि किं पुनः स्त्रीत्वमे
कका ॥ १२४ ॥ इंद्राद्याः सकला देवास्तस्थुर्येषां न सं
युगे ॥ शुंभादीनां कथं तेषां स्त्री प्रयास्यसि संमुखम्
१२५ ॥ सा त्वं गच्छ मयैवोक्ता पार्श्वं शुंभनिशुंभयोः
केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ॥ १२६ ॥ ८१

CC-0. In Public Domain. Funding by IKS-MoE

देव्युवाच ॥ १२७ ॥ एवमेतद्बली शुंभो निशुंभश्चा
वीर्य्यवान् ॥ किं करोमि प्रतिज्ञा मे यदनालोचि
पुरा ॥ १२८ ॥ स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमा
तः ॥ तदा च स्वासुरेंद्राय स च युक्तं करोतु यत् ॥
२९ ॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे
देवीमाहात्म्ये देवीदूतसंवादः ॥ ऋषिरुवाच
॥ इत्याकर्ण्य वचो देव्याः स दूतोमर्षपूरितः ॥ समा

Digitized by eGangotri

चष्ट समागम्य दैत्यराजाय विस्तरात् ॥ २ ॥ तस्य दू-
तस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ॥ सक्रोधः प्राह दै-
त्यानामधिपं धूम्रलोचनम् ॥ ३ ॥ हे धूम्रलोचनाशु
त्वं स्वसैन्यपरिवारितः ॥ तामानय बलाद्दुष्टां केशा-
कर्षणविह्वलाम् ॥ ४ ॥ तत्परित्राणदः कश्चिद्यदि वो-
त्तिष्ठतेऽपरः ॥ स हंतव्योऽमरो वापि यक्षो गंधर्व एव वा
॥ ५ ॥ ऋषिरुवाच ॥ ६ ॥ तेनाज्ञप्तस्ततः शीघ्रं स दै-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

त्यो धूम्रलोचनः ॥ हतः षष्ट्या सहस्राणामसुराणां द्रुत-
ययौ ॥ ७ ॥ स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिता-
म् ॥ जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ॥
८ ॥ न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ॥ ततो ब-
लान्नयाम्येष केशाकर्षणविह्वलाम् ॥ ९ ॥ देव्युवा-
च ॥ १० ॥ दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः ॥
बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥ ११ ॥ ८४

CC-0. In Public Domain. Funding by IKS-MoE

ऋषिरुवाच ॥ १२ ॥ इत्युक्तः सोऽभ्यधावत्तामसुरो धू-
म्रलोचनः । हुंकारेणैव तं भस्म सा चकारांबिका ततः
॥ १३ ॥ अथ क्रुद्धं महासैन्यमसुराणां तथांबिका ॥
ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥ १४ ॥ त-
तो धुतसटः कोपात्कृत्वा नादं सुभैरवम् ॥ पपातासुर
सेनायां सिंहो देव्याः स्ववाहनः ॥ १५ ॥ कांश्चित् करप्र
हारेण दैत्यानास्येन चापरान् ॥ आक्रान्त्या चाधरेणा- ८५

Digitized by eGangotri
CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

न्यान्जघान स महासुरान् ॥ २६ ॥ केषांचित्ताडया-
मास नखैः कोष्ठानि केसरी ॥ तथा तलप्रहारेण शिरो
सि कृतवान् पृथक् ॥ २७ ॥ विच्छिन्नबाहुशिरसः कृ-
ता स्तेन तथापरे ॥ पपौ च रुधिरं कोष्ठादन्येषां धुतकेस-
रः ॥ २८ ॥ क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ॥
तेन केसरिणा देव्या वाहनेनातिकोपिना ॥ २९ ॥ श्रु-
त्वा तमसुरं देव्या निहतं धूम्रलोचनम् ॥ बलं च क्षयि-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ं कृतं देवी केशरिणा ततः ॥ २० ॥ चुकोप दैत्याधि
पतिः शुंभः प्रस्फुरिताधरः ॥ आज्ञापयामास च तौ चंड
मुंडौ महासुरौ ॥ २१ ॥ हे चंड हे मुंड बलैर्बहुलैः परि
वारितौ ॥ तत्र गच्छत गत्वा च सा समानीयतां लघु ॥
२२ ॥ केशेष्वाकृष्य बध्वा वा यदि वः संशयो युधि ॥
तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥ २३ ॥ तस्यां
हतायां दुष्टायां सिंहे च विनिपातिते ॥ शीघ्रमागम्य-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तांवध्वा गृहीत्वा तामथांविकाम् ॥ २४ ॥ इति मा-
र्कंडेय पुराणे सावर्णिके मन्वंतरे देवी माहात्म्ये धूम्र
लोचन वधः षष्ठः ॥ ऋषिरुवाच ॥ १ ॥ आज्ञप्ता
स्ते ततो दैत्याश्चंड मुंड पुरोगमाः ॥ चतुरंग बलोपेता
ययु रभ्युद्यतायुधाः ॥ २ ॥ ददृशुस्ते ततो देवी मीषद्धा
सां व्यवस्थिताम् ॥ सिंहस्योपरि शैलेंद्र शृंगे महति-
कांचने ॥ ३ ॥ ते दृष्ट्वा तां समादातु मुद्यमं चक्रुरुद्यताः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

। आकृष्टचापासि धरा स्तथान्येतत्समीपगाः ॥ ४॥
ततः कोपं चकारोच्चै रंबिका तानरी न्प्रति ॥ कोपेन चा-
स्या वदनं मसी वर्ण मभूत्तदा ॥ ५ ॥ भ्रुकुटी कुटिलात्त-
स्या ललाट फलकाद्दुतम् ॥ काली करालवदना विनि-
ष्क्रांतासिपाशिनी ॥ ६ ॥ विचित्र खट्वांग धरा नर मा-
ला विभूषणा ॥ द्वीपि चर्म्म परीधाना शुष्क मांसाति
भैरवा ॥ ७ ॥ अति विस्तार वदना जिह्वाललन भीष षणा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

रा ॥ निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥ ८ ॥
सा वेगेनाभिपतिता घातयन्ती महासुरान् ॥ सैन्ये त-
त्र सुरारीणामभक्षयत तद्बलम् ॥ ९ ॥ पार्ष्णिग्राहा-
ङ्कुशग्राहियोधघण्टासमन्वितान् ॥ समादायैकह-
स्तेन मुखे चिक्षेप वारणान् ॥ १० ॥ तथैव योधं तुरगै
रथं सारथिना सह ॥ निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्य-
तिभैरवम् ॥ ११ ॥ एकं जग्राह केशेषु ग्रीवायामथ- ३०

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

चापरम् ॥ पादेन कस्य चैवान्यमुरसान्यमपोथयत् ॥
२२॥ तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः ॥
मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥ २३ ॥ बलि-
ना तद्बलं सर्वमसुराणां महात्मनाम् ॥ ममर्दाभक्षय-
च्चान्यानन्यांश्चाताडयत्तदा ॥ २४ ॥ असिना निह-
ताः केचित्केचित्खट्वाङ्गताडिताः ॥ जग्मुर्विनाशमसुरा दं-
ताग्राभिहतास्तथा ॥ २५ ॥ क्षणेन तद्बलं सर्वमसुरा दे०१

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

णां निपातितम् ॥ दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमति
भीषणाम् ॥ १६ ॥ शरवर्षैर्महाभीमैर्भीमाक्षीं तां म-
हासुरः ॥ छादयामास चक्रैश्च मुंडः क्षिप्तैः सहस्रशः
॥ १७ ॥ तानि चक्राण्यनेकानि विशमानानि तन्मु-
खम् ॥ बभुर्यथार्कबिंबानि सुबहूनि घनोदरम् ॥
१८ ॥ ततो जहासातिरुषा भीमं भैरवनादिनी ॥ का-
लीकरालवक्रांतर्दुर्दर्शदशनोज्ज्वला ॥ १९ ॥ उत्थाय

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

च महासिंहं देवी चंडमधावत ॥ गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥ २० ॥ अथ मुंडोप्यधावत्तां दृष्ट्वा चंडं निपातितम् ॥ तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा ॥ २१ ॥ हतशेषं ततः सैन्यं दृष्ट्वा चण्डंनिपातितम् ॥ मुंडं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥ २२ ॥ शिरश्चंडस्य काली च गृहीत्वा मुंडमेव च ॥ प्राह प्रचंडाट्टहासमिश्रमभ्येत्य चंडिकाम् ॥ ९३

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

२३ ॥ मया तवात्रोपहृतौ चंड मुंडौ महा पशू ॥ युद्धय-
ज्ञे स्वयं शुंभं निशुंभंच हनिष्यसि ॥ २४ ॥ ऋषिरुवा
च ॥ २५ ॥ तावानीतौ ततो दृष्ट्वा चंड मुंडौ महासुरौ ॥
उवाच काली कल्याणी ललितं चंडिका वचः ॥ २६ ॥
यस्माच्चंडं च मुंडंच गृहीत्वा त्वमुपागता ॥ चामुंडेति
ततो लोके ख्याता देवि भविष्यसि ॥ २७ ॥ इति मार्कं
डेय पुराणे सावर्णिके मन्वंतरे देवी माहात्म्ये चंड मुंड ९९

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ध्यः ॥ ७ ॥ ऋषिरुवाच ॥ १ ॥ चंडे च निहते दैत्ये मुं-
डे च विनिपातिते ॥ बहुलेषु च सैन्येषु क्षयितेष्वसुरे-
श्वरः ॥ २ ॥ ततः कोपपराधीनचेताः शुंभः प्रतापवा-
न् ॥ उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥ ३ ॥
अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ॥ कंबूनां च-
तुरशीतिर्निर्यांतु स्वबलैर्वृताः ॥ ४ ॥ कोटिवीर्या-
णि पंचाशदसुराणां कुलानि वै ॥ शतं कुलानि धौम्रा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

णां निर्गच्छंतु ममाज्ञया ॥ ५ ॥ कालकादौर्हृदा मौर्याः
कालकेयास्तथासुराः ॥ युद्धाय सज्जा निर्यांतु आज्ञया
त्वरिता मम ॥ ६ ॥ इत्याज्ञाप्यासुरपतिः शुंभो भैरव-
शासनः ॥ निर्जगाम महासैन्य सहस्रैर्बहुभिर्वृतः ॥
७ ॥ आयांतं चंडिका दृष्ट्वा तत्सैन्यमतिभीषणम् ॥
ज्यास्वनैः पूरयामास धरणीगगनांतरम् ॥ ८ ॥ ततः
सिंहो महानादमतीव कृतवान्नृप ॥ घंटास्वनेन त- ई

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

न्नादमंबिका चोपबृंहयत् ॥ ९ ॥ धनुर्ज्यासिंहघंटा
नां नादापूरितदिङ्मुखा ॥ निनादैर्भीषणैः काली जिग्ये
विस्तारितानना ॥ १० ॥ तंनिनादमुपश्रुत्य दैत्यसैन्यै
श्चतुर्दिशम् ॥ देवी सिंहस्तथा काली सरोषैः परिवारिताः
॥ ११ ॥ एतस्मिन्नंतरे भूप विनाशाय सुरद्विषाम् । भवा-
यामरसिंहानामतिवीर्यबलान्विताः ॥ १२ ॥ ब्रह्मेश
गुहविष्णूनां तथेंद्रस्य च शक्तयः ॥ शरीरेभ्यो विनिष्क्र-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

म्य तद्रूपैश्चंडिकां ययुः ॥ १३ ॥ यस्य देवस्य यद्रूपं यथा-
भूषणवाहनम् ॥ तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाय-
यौ ॥ १४ ॥ हंसयुक्तविमानाग्रे साक्षसूत्रकमंडलुः ॥
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥ १५ ॥
माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ॥ महाहिवल-
याप्राप्ता चंद्ररेखाविभूषणा ॥ १६ ॥ कौमारी शक्तिहस्ता
च मयूरवरवाहना ॥ योद्धुमभ्याययौ दैत्यानंबिकागु-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

हरूपिणी ॥ १७ ॥ तथैव वैष्णवी शक्तिर्गरुडोपरिसंस्थि-
ता ॥ शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥ १८ ॥
यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ॥ शक्तिः साप्या-
ययौ तत्र वाराहीं बिभ्रती तनुम् ॥ १९ ॥ नारसिंही नृ-
सिंहस्य बिभ्रती सदृशं वपुः ॥ प्राप्ता तत्र सटाक्षेपक्षि-
प्तनक्षत्रसंहतिः ॥ २० ॥ वज्रहस्ता तथैवैन्द्री गजराजो-
परिस्थिता ॥ प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

॥ २१ ॥ ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ॥ ह-
न्यंतामसुराः शीघ्रं मम प्रीत्याह चंडिकाम् ॥ २२ ॥ ततो
देवीशरीरात्तु विनिष्क्रांतातिभीषणा ॥ चंडिकाशक्तिर-
त्युग्रा शिवाशतनिनादिनी ॥ २३ ॥ सा चाह धूम्रज-
टिलमीशानमपराजिता ॥ दूत त्वं गच्छ भगवन् पा-
र्श्वं शुंभनिशुंभयोः ॥ २४ ॥ ब्रूहि शुंभं निशुंभं च दान-
वावतिगर्वितौ ॥ ये चान्ये दानवास्तत्र युद्धाय समुप- ९०

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

स्थिताः ॥ २५ ॥ त्रैलोक्यमिंद्रो लभतां देवाः संतु हवि-
र्भुजः ॥ यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥
२६ ॥ बलावलेपादथ चेद्भवंतो युद्धकांक्षिणः ॥ त-
दागच्छत तृप्यंतु मच्छिवाः पिशितेन वः ॥ २७ ॥ य-
तो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ॥ शिव-
दूतीति लोकेस्मिंस्ततः सा ख्यातिमागता ॥ २८ ॥
तेपि श्रुत्वा वचो देव्याः सर्वाख्यातं महासुराः ॥ अ-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

मर्षापूरिता जग्मुर्यतः कात्यायनी स्थिता ॥ २९ ॥ ततः
प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ॥ ववर्षुरुद्धताम-
र्षास्तां देवीममरारयः ॥ ३० ॥ सा च तान्प्रहितान्बा-
णाञ्छूलशक्तिपरश्वधान् ॥ चिच्छेद लीलयाध्मातध
नुर्मुक्तैर्महेषुभिः ॥ ३१ ॥ तस्याग्रतस्तथा काली शूल
पातविदारितान् ॥ खट्वाङ्गपोथितांश्चारीन्कुर्वती-
व्यचरत्तदा ॥ ३२ ॥ कमण्डलुजलाक्षेपहतवीर्यान्हतौ

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

रः ॥ ब्रह्माणी चाकरोच्छत्रून् येन येन स्म धावति ॥
३३ ॥ माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ॥ दैत्या-
न्जघान कौमारी तथा शक्त्यातिकोपना ॥ ३४ ॥ ऐन्द्री
कुलिशपातेन शतशो दैत्यदानवाः ॥ पेतुर्विदारिताः
पृथ्व्यां रुधिरौघप्रवर्षिणः ॥ ३५ ॥ तुंडप्रहारविध्वस्ता
दंष्ट्राग्रक्षतवक्षसः ॥ वाराहमूर्त्या न्यपतंश्चक्रेण चवि
दारिताः ॥ ३६ ॥ नखैर्विदारितांश्चान्यान् भक्षयंती २०३

CC-0. In Public Domain. Funding by IKS-MoE

महासुरान् ॥ नारसिंही च चाराजौ नादापूर्णदिगंबरा
। ३७ ॥ चंडाट्टहासैरसुराः शिवदूत्यभिदूषिताः ॥ पे-
तुः पृथिव्यां पतितांस्तांश्च खादाथ सा तदा ॥ ३८ ॥ इ-
ति मातृगणं क्रुद्धं मर्दयंतं महासुरान् ॥ दृष्ट्वाभ्युपायै-
र्विविधैर्नेशुर्देवारिसैनिकाः ॥ ३९ ॥ पलायनपरान्
दृष्ट्वा दैत्यान्मातृगणार्दितान् ॥ योद्धुमभ्याययौ क्रुद्धो
रक्तबीजो महासुरः ॥ ४० ॥ रक्तबिंदुर्यदा भूमौ पतत्य- १०४

Digitized by eGangotri
CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

स्य शरीरतः ॥ समुत्पतति मेदिन्यांस्तत्प्रमाणस्तदासु-
रः ॥ ४१ ॥ युयुधे स गदापाणिरिंद्रशक्त्या महासुरः ॥ त-
तश्चैंद्री स्ववज्रेण रक्तबीजमताडयत् ॥ ४२ ॥ कुलिशे-
नाहतस्याशु बहु सुस्राव शोणितम् ॥ समुत्तस्थुस्त-
तो योधास्तद्रूपास्तत्पराक्रमाः ॥ ४३ ॥ यावंतः पतिता-
स्तस्य शरीराद्रक्तबिंदवः ॥ तावंतः पुरुषा जातास्तद्वी-
र्यबलविक्रमाः ॥ ४४ ॥ ते चापि युयुधुस्तत्र पुरुषा रक्त- १०५

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

संभवाः ॥ सर्वं मातृभिरत्युग्रं शस्त्रपातातिभीषण-
म् ॥ ४५ ॥ पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ॥
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥ ४६ ॥ वै-
ष्णवी समरे चैनं चक्रेणाभिजघान ह ॥ गदया ताडया
मास ऐन्द्री तमसुरेश्वरम् ॥ ४७ ॥ वैष्णवी चक्रभिन्न-
स्यरुधिरस्रावसंभवैः ॥ सहस्रशो जगद्व्याप्तं तत्प्रमा-
णैर्महासुरैः ॥ ४८ ॥ शक्त्या जघान कौमारी वाराही च ॥ १०६

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तथासिना ॥ माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ।
॥ ४९ ॥ स चापि गदया दैत्यः सर्वा एवाहनत्पृथक्
॥ मातॄः कोपसमाविष्टो रक्तबीजो महासुरः ॥ ५० ॥ त-
स्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ॥ पपात यो वै
रक्तौघस्तेनासञ्छतशोऽसुराः ॥ ५१ ॥ तैश्चासुरासृक्संं
भूतैरसुरैः सकलं जगत् ॥ व्याप्तमासीत्ततो देवा भयमा
जग्मुरुत्तमम् ॥ ५२ ॥ तान्विषण्णान्सुरान्दृष्ट्वा चंडिका १०७

Digitized by eGangotri

प्राहसत्वरा ॥ उवाच कालीं चामुंडे विस्तरं वदनं कुरु ॥
५३ ॥ मच्छस्त्रपातसंभूतान् रक्तविंदून्महासुरान् ॥ र-
क्तविंदोः प्रतीच्छत्वं वक्रेणानेन वेगिता ॥ ५४ ॥ भक्ष-
यंती चर रणे तदुत्पन्नान्महासुरान् ॥ एवमेष क्षयं दै-
त्यः क्षीणरक्तो गमिष्यति ॥ ५५ ॥ भक्ष्यमाणास्त्वया-
चोग्रा न चोत्पत्स्यंति चापरे ॥ इत्युक्त्वा तां ततो देवी शू-
लेनाभिजघान तम् ॥ ५६ ॥ मुखेन काली जगृहे रक्त

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

बीजस्य शोणितम् ॥ ततो सावाजघा नाथ गदया तत्र
चंडिकाम् ॥ ५७ ॥ न चास्या वेदनां चक्रे गदापातो-
ल्पिकामपि ॥ तस्या हतस्य देहात्तु बहु सुस्राव शोणि
तम् ॥ ५८ ॥ यतस्ततस्तद्वक्त्रेण चामुंडा संप्रतीच्छ-
ति ॥ मुखे समुद्गता येस्या रक्तपातान्महासुराः ॥ ५९
॥ तांश्च खादाथ चामुंडा पपौ तस्य च शोणितम् ॥ देवी
शूलेन वज्रेण बाणैरसिभि ऋष्टिभिः ॥ ६० ॥ १०९

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

जघान रक्तबीजं तं चामुण्डा पीत शोणितम्॥ स प पात म-
ही पृष्ठे शस्त्र संघा समाहतः॥ ६१॥ नीरक्तश्च महीपाल
रक्तबीजो महासुरः॥ ततस्ते हर्षमतुलमवापुस्त्रिदशा
नृप॥ ६२॥ तेषां मातृगणो जातो ननर्ता सृङ्मदोद्धतः
॥ ६३॥ इति मार्कंडेय पुराणे सावर्णिके मन्वंतरे देवी
माहात्म्ये रक्तबीज वधः॥ ८॥ राजोवाच॥ १॥ विचि
त्रमिदमाख्यातं भगवन् भवता मम॥ देव्याश्चरितमा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

हात्म्यं रक्तवीजवधाश्रितम् ॥ २ ॥ भूयश्चेच्छाम्यहं-
श्रोतुं रक्तवीजे निपातिते ॥ चकार शुंभो यत्कर्म निशुंभ
श्चातिकोपनः ॥ ३ ॥ ऋषिरुवाच ॥ ४ ॥ चकार कोपम-
तुलं रक्तवीजे निपातिते ॥ शुंभासुरो निशुंभश्च हतेष्व-
न्येषु चाहवे ॥ ५ ॥ हन्यमानं महासैन्यं विलोक्यामर्ष
मुद्वहन् ॥ अभ्यधावन् निशुंभोऽथ मुख्ययासुरसेन-
या ॥ ६ ॥ तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः १११

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

॥ संदष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥ ७ ॥ आज-
गाम महावीर्यः शुंभोपि स्वबलैर्वृतः ॥ निहंतुं चंडिकां
कोपात्कृत्वा युद्धंतु मातृभिः ॥ ८ ॥ ततो युद्धमतीवासी
द्देव्याः शुंभनिशुंभयोः ॥ शरवर्षमतीवोग्रं मेघयोरिव
वर्षतोः ॥ ९ ॥ चिच्छेदास्तांछरांस्ताभ्यां चंडिकास्वश-
रोत्करैः ॥ ताडयामास चांगेषु शस्त्रौघैरसुरेश्वरौ ॥ १०
॥ निशुंभो निशितं खड्गं चर्म्म चादाय सुप्रभम् ॥ स-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥ ११ ॥ ताडि
ते वाहने देवी क्षुरप्रेणासिमुत्तमम् ॥ निशुंभस्याशु चि
च्छेद चर्म चाप्यष्टचंद्रकम् ॥ १२ ॥ छिन्ने चर्मणि ख
ड्गे च शक्तिं चिक्षेप सोऽसुरः ॥ तामप्यस्य द्विधा चक्रे चक्रे
णाभिमुखागताम् ॥ १३ ॥ कोपाध्मातो निशुंभोऽथ
शूलं जग्राह दानवः ॥ आयातं मुष्टिपातेन देवी तच्चाप्य
चूर्णयत् ॥ १४ ॥ आविध्याथ गदां सोऽपि चिक्षेप चंडिकां ॥ १५

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

पति ॥ सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता ॥
२५ ॥ ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् ॥ आहृ-
त्य देवी बाणौघैरपातयत भूतले ॥ २६ ॥ तस्मिन्निपति
ते भूमौ निशुम्भे भीमविक्रमे ॥ भ्रातर्यतीव संक्रुद्धः प्रय-
यौ हन्तुमम्बिकाम् ॥ २७ ॥ स रथस्थस्तथात्युच्चैर्गृहीतप
रमायुधैः ॥ भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः ॥
॥ २८ ॥ तमायान्तं समालोक्य देवी शङ्खमवादयत् ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ज्याशब्दं चापिधनुषश्चकारातीव दुःसहम् ॥ १९ ॥ पू-
रयामास ककुभो निज घंटा स्वनेन च ॥ समस्तदैत्य सै-
न्यानां तेजो वधविधायिना ॥ २० ॥ ततःसिंहो महा ना
दैः स्त्याजितेभमहा मदैः ॥ पूरयामास गगनं गां तथो-
पदिशो दश ॥ २१ ॥ ततः काली समुत्पत्य गगनं क्ष्मा
मताडयत् ॥ कराभ्यां तन्निनादेन प्राक् स्वनास्तेति रो
हिताः ॥ २२ ॥ अट्टहासमशिवं शिवदूती चकार ह ॥ ११५

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तैः शरै रसुरास्तेसुः शुंभः कोपं परं ययौ ॥ २३ ॥ दुरा-
त्मंस्तिष्ठतिष्ठेति व्याजहारांबिका यदा ॥ तदा जयेत्यभि-
हितं देवैराकाशसंस्थितैः ॥ २४ ॥ शुंभेनागत्य या श-
क्तिर्मुक्ता ज्वालातिभीषणा ॥ आयांती वन्हिकूटाभा सा
निरस्ता महोल्कया ॥ २५ ॥ सिंहनादेन शुंभस्य व्याप्तं-
लोकत्रयांतरम् ॥ निर्घातनिःस्वनो घोरो जितवानवनी
पते ॥ २६ ॥ शुंभमुक्ताञ्छरान्देवी शुंभस्तत्प्रहिताञ्छ

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

रान् ॥ चिच्छेद स्वशरै रुग्रैः शतशोऽथ सहस्रशः ॥
२७ ॥ ततस्तान्चंडिका क्रुद्धा शूलेनाभिजघानतम् ॥
स तदाभिहतो भूमौ मूर्च्छितो निपपातह ॥२८॥ ततो निशुं-
भः संप्राप्य चेतना मात्त कार्मुकः ॥ आजघान शरै र्देवीं
कालीं केशरिणं तथा ॥ २९ ॥ पुनश्च कृत्वा बाहूनाम
युतं दनुजेश्वरः ॥ चक्रायुधेन दितिजश्छादयामास चं-
डिकाम् ॥ ३० ॥ ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

नी ॥ चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥
३१ ॥ ततो निशुंभो वेगेन गदामादाय चंडिकाम् ॥
अभ्यधावत वै हंतुं दैत्यसेनासमावृतः ॥ ३२ ॥ तस्या
पतत एवाशु गदां चिच्छेद चंडिका ॥ खड्गेन शितधारे-
ण स च शूलं समाददे ॥ ३३ ॥ शूलहस्तं समायातं निशुं-
भममरार्दनम् ॥ हृदि विव्याध शूलेन वेगाविद्धेन चंडि
का ॥ ३४ ॥ भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽप- ११८

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

दु० रः ॥ महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥ तस्य
१९ निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ॥ शिरश्चिच्छेद
खड्गेन ततो सावपतद्भुवि ॥ ३६ ॥ ततः सिंहश्चखादो
ग्रंदंष्ट्राक्षुण्णशिरोधरान् ॥ असुरांस्तांस्तथा कालीशि
वदूती तथापरान् ॥ ३७ ॥ कौमारीशक्तिनिर्भिन्नाः के
चिन्नेशुर्महासुराः ॥ ब्रह्माणीमंत्रपूतेन तोयेनान्ये नि-
राकृताः ॥ ३८ ॥ माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्त- २१

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

था परे ॥ वाराही तुंड घातेन केचिच्चूर्णी कृता भुवि ॥
३९ ॥ खंड खंडं च चक्रेण वैष्णव्या दानवाः कृताः ॥
वज्रेण चैंद्री हस्ताग्र विमुक्तेन तथा परे ॥ ४० ॥ केचि-
द्विनेशुर सुराः केचिन्नष्टा महाहवात् ॥ भक्षिता श्चाप
रे काली शिव दूती मृगाधिपैः ॥ ४१ ॥ इति मार्कंडे
य पुराणे सा वर्णिके मन्वंतरे देवी माहात्म्ये निशुंभव-
धः ॥ ९ ॥ ऋषिरुवाच ॥ १ ॥ निशुंभं निहतं दृष्ट्वा भ्रा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तरं प्राण सम्मितम् ॥ हन्यमानं बलं चैव शुंभः क्रुद्धो
ऽब्रवीद्वचः ॥ २॥ बलावलेप दुष्टे त्वं मा दुर्गे गर्व माव
ह ॥ अन्यासां बलमाश्रित्य युध्यसे यातिमानिनी ॥
३॥ देव्युवाच ॥ ४॥ एकैवाहं जगत्यत्र द्वितीया काम
मापरा ॥ पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥
५॥ ततः समस्तास्ता देव्यो ब्रह्माणी प्रमुखा लयम् ॥
तस्या देव्यास्तनौ जग्मुरेकैवासी त्तदांबिका ॥ ६॥ देव्यु १२१

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

वाच ॥ ७ ॥ अहं विभूत्या बहुभिरिह रूपैर्यदा स्थिता ॥
तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥ ८ ॥ ऋ·
षिरुवाच ॥ ९ ॥ ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभ
योः ॥ पश्यतां सर्वदेवानामसुराणां च दारुणम् ॥ १०
॥ शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ॥ त·
योर्युद्धमभूद्भूयः सर्वलोकभयंकरम् ॥ ११ ॥ दिव्या
न्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ॥ बभंजता १२

CC-0. In Public Domain. Funding by IKS-MoE

नि दैत्येन्द्रस्तन्मतीघातकर्तृभिः ॥ २२ ॥ मुक्तानि तेन-
चास्त्राणि दिव्यानि परमेश्वरी ॥ बभंज लीलयैवोग्रहुं
कारोच्चारणादिभिः ॥ २३ ॥ ततः शरशतैर्देवीमाच्छाद
यत सोऽसुरः ॥ सापि तत्कुपिता देवी धनुश्चिच्छेद चेषु
भिः ॥ २४ ॥ छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे
॥ चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥ २५
॥ ततः खड्गमुपादाय शतचन्द्रं च भानुमत् ॥ अभ्यधा·

Digitized by eGangotri

वत्तदा देवीं दैत्यानामधिपेश्वरः ॥ २६ ॥ तस्यापततस्त
थाशु खड्गं चिच्छेद चंडिका ॥ धनुर्मुक्तैः शितैर्बाणैश्चर्म
चार्ककरामलम् ॥ २७ ॥ हताश्वः स तदा दैत्यश्छिन्न
धन्वा विसारथिः ॥ जग्राह मुद्गरं घोरमंबिकानिधनोद्य
तः ॥ २८ ॥ चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः
॥ तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् ॥ २९
॥ स मुष्टिं पातयामास हृदये दैत्यपुंगवः ॥ देव्यास्तं चा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

पि सा देवी तले नोरस्य ताडयत् ॥ २० ॥ तल प्रहाराभि
हतो निपपात महीतले ॥ स दैत्य राजः सहसा पुन रेव
तथोत्थितः ॥ २१ ॥ उत्पत्य च प्रगृह्योच्चै देवीं गगन-
मास्थितः ॥ तत्रापि सा निराधारा युयुधे तेन चंडिका
॥ २२ ॥ नियुद्धं खे तदा दैत्य श्चंडिका च परस्परम् ॥
चक्रतुः प्रथमं सिद्ध मुनि विस्मय कारकम् ॥ २३ ॥
ततो नियुद्धं सुचिरं कृत्वा तेनां बिका सह ॥ उत्पात्य १२५

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

मया मास चिक्षेप धरणीतले ॥ २४ ॥ सत्क्षितोधर
प्राप्य मुष्टिमुद्यम्य वेगितः ॥ अप्यधावत दुष्टात्मा
डिका निधनेच्छया ॥ २५ ॥ तमायांतं ततो देवी
दैत्यजनेश्वरम् ॥ जगत्यां पातयामास भित्वा शू-
नवक्षसि ॥ २६ ॥ स गतासुः पपातोर्व्यां देवीशू-
ाग्र विक्षतः ॥ चालयन् सकलां पृथ्वीं साब्धिद्वीपां स
वताम् ॥ २७ ॥ ततः प्रसन्नमखिलं हते तस्मिन् दु- १२९

CC-0. In Public Domain. Funding by IKS-MoE

रात्मनि ॥ जगत्स्वास्थ्य मतीवाप निर्मलं चाभवन्न-
भः ॥ २८ ॥ उत्पात मेघाः सोल्काये प्रागासंस्ते शमं य-
युः ॥ सरितो मार्गवाहिन्य स्तथा संस्तत्र पातिते ॥ २९
॥ ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ॥ बभूवुर्नि
हते तस्मिन् गंधर्वा ललितं जगुः ॥ ३० ॥ अवादयंस्त
थैवान्ये ननृतुश्चाप्सरोगणाः ॥ ववुः पुण्यास्तथा वाता
स्सुप्रभोभूद्दिवाकरः ॥ ३१ ॥ जज्वलुश्चाग्नयः शांताः

Digitized by eGangotri

शांतदिग्जनितस्वनाः ॥ ३२ ॥ इतिमार्कंडेयपुराणे
सावर्णिकेमन्वंतरे देवीमाहात्म्ये शुंभवधः ॥ १० ॥ ऋ
षिरुवाच ॥ १॥ देव्या हते तत्र महासुरेंद्रे सेंद्रा स्सुर
वन्हिपुरोगमास्ताम् ॥ कात्यायनीं तुष्टुवुरिष्टलाभा
द्विकासिवक्त्राब्जविकासिताशाः ॥ २॥ देविप्रपन्ना
र्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ॥ प्रसीद
विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥ ३३…

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

३ ॥ आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः
स्थितासि ॥ अपां स्वरूपस्थितया त्वयैतदाप्यायते
कृत्स्नमलंघ्यवीर्ये ॥ ४ ॥ त्वं वैष्णवी शक्तिरनंतवीर्या
विश्वस्य बीजं परमासि माया ॥ संमोहितं देवि सम-
स्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ५ ॥ विद्याः सम-
स्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु ॥
त्वयैकया पूरितमंबयैतत्का ते स्तुतिः स्तव्यपरापरो- १२९

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

शांतदिग्जनितस्वनाः ॥ ३२ ॥ इतिमार्कंडेयपुराणे
सावर्णिकेमन्वंतरे देवीमाहात्म्येशुंभवधः ॥ १० ॥ ऋ
षिरुवाच ॥ १ ॥ देव्याहतेतत्रमहासुरेंद्रे सेंद्राः सुरा
वह्निपुरोगमास्ताम् ॥ कात्यायनींतुष्टुवुरिष्टलाभा
द्विकासिवक्त्राब्जविकासिताशाः ॥ २ ॥ देविप्रपन्ना
र्तिहरे प्रसीद प्रसीद मातर्जगतोखिलस्य ॥ प्रसीद
विश्वेश्वरिपाहिविश्वंत्वमीश्वरीदेविचराचरस्य ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

३॥ आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः
स्थितासि ॥ अपां स्वरूपस्थितया त्वयैतदाप्यायते
कृत्स्नमलंघ्यवीर्ये ॥ ४ ॥ त्वं वैष्णवी शक्तिरनंतवीर्या
विश्वस्य बीजं परमासि माया ॥ संमोहितं देवि सम-
स्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ५ ॥ विद्याः सम-
स्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु ॥
त्वयैकया पूरितमंबयैतत्का ते स्तुतिः स्तव्यपरापरो-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ऽक्तिः ॥ ६ ॥ सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी ॥
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥ ७ ॥ सर्वस्य
बुद्धिरूपेण जनस्य हृदि संस्थिते ॥ स्वर्गापवर्गदे देवि-
नारायणि नमोऽस्तु ते ॥ ८ ॥ कलाकाष्ठादिरूपेण परिणाम
प्रदायिनि ॥ विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते
॥ ९ ॥ सर्वमंगलमंगल्ये शिवे सर्वार्थसाधिके ॥ शर
ण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥ १० ॥ सृष्टि- २३०

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

स्थिति विनाशानां शक्तिभूते सनातनि ॥ गुणाश्रये गु-
णमये नारायणि नमोऽस्तु ते ॥ २१ ॥ शरणागतदीना-
र्तपरित्राणपरायणे ॥ सर्वस्यार्तिहरे देवि नारायणि न-
मोऽस्तु ते ॥ २२ ॥ हंसयुक्तविमानस्थे ब्रह्माणीरूपधारि-
णि ॥ कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते ॥ २३
॥ त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ॥ माहेश्वरीस्व-
रूपेण नारायणि नमोऽस्तु ते ॥ २४ ॥ मयूरकुक्कुटवृते म-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

हाशक्तिधरेऽनघे ॥ कौमारी रूपसंस्थाने नारायणि नमो
ऽस्तु ते ॥ २४ ॥ शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे ॥
प्रसीद वैष्णवी रूपे नारायणि नमोऽस्तु ते ॥ २६ ॥ गृही
तोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे ॥ वाराहरूपिणि शिवे ना
रायणि नमोऽस्तु ते ॥ २७ ॥ नृसिंहरूपेणोग्रेण हंतुं दै
त्यान्कृतोद्यमे ॥ त्रैलोक्यत्राणसहिते नारायणि नमोऽ
स्तु ते ॥ २८ ॥ किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ॥ १३९

CC-0. In Public Domain. Funding by IKS-MoE

॥ वृत्र प्राण हरे चैन्द्रि नारायणि नमोऽस्तुते ॥ १९ ॥ शिव
दूती स्वरूपेण हत दैत्य महाबले ॥ घोर रूपे महारावे नार
यणि नमोऽस्तुते ॥ २० ॥ दंष्ट्रा करालवदने शिरोमाला
विभूषणे ॥ चामुंडे मुंड मथने नारायणि नमोऽस्तुते ॥
२१ ॥ लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे ॥ महा-
रात्रि महाविद्ये नारायणि नमोऽस्तुते ॥ २२ ॥ मेधे सरस्व
तिवरे भूति बाभ्रवि तामसि ॥ नियते त्वं प्रसीदेशे नारा

Digitized by eGangotri

पापान्नमोऽस्तुते ॥ २३ ॥ सर्वस्वरूपे सर्वेशे सर्वशक्ति स-
मन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते ॥२४
॥ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥ पातु नः सर्व
भूतेभ्यः कात्यायनि नमोऽस्तुते ॥ २५ ॥ ज्वालाकरा-
लमत्युग्रमशेषासुरसूदनम् ॥ त्रिशूलं पातु नो भीतेर्भ
द्रकालि नमोऽस्तुते ॥ २६ ॥ हिनस्ति दैत्यतेजांसि स्व-
नेनापूर्य या जगत् ॥ सा घंटा पातु नो देवि पापेभ्योनः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

सुतानिव ॥ २७ ॥ असुरासृग्वसापङ्कचर्चितस्ते क-
रोज्ज्वलः ॥ शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥
२८ ॥ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकला-
नभीष्टान् ॥ त्वामाश्रितानां न विपन्नराणां त्वामाश्रि-
ता ह्याश्रयतां प्रयान्ति ॥ २९ ॥ एतत्कृतं यत्कदनं त्वया-
द्य धर्मद्विषां देवि महासुराणाम् ॥ रूपैरनेकैर्बहुधात्म-
मूर्तिं कृत्वाम्बिके तत्प्रकरोति कान्या ॥ ३० ॥ विद्यासु-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

रागद्वेषसुविवेकदीपैर्ध्यायेषु वाक्येषु च कालदन्त्या ॥
ममत्वगर्तेति महांधकारे विभ्रामयत्येतदतीव विश्व
म् ॥ ३२ ॥ रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो द-
स्युबलानि यत्र ॥ दावानलो यत्र तथाब्धिमध्ये तत्र
स्थिता त्वं परिपासि विश्वम् ॥ ३३ ॥ विश्वेश्वरी त्वं परि
पासि विश्वं विश्वात्मिका धारयसीति विश्वम् ॥ विश्वे
शवंद्या भवती भवंति विश्वाश्रया ये त्वयि भक्तिनम्राः १३६

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

॥ ३३ ॥ देवि प्रसीद परिपालय नोरिभीतेर्नित्यं यथासु-
रवधादधुनैव सद्यः ॥ पापानि सर्वजगतां प्रशमं नया-
शु उत्पातपाकजनितांश्च महोपसर्गान् ॥ ३४ ॥ प्र-
णतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ॥ त्रैलोक्य
वासिनामीड्ये लोकानां वरदा भव ॥ ३५ ॥ देव्युवाच
॥ ३६ ॥ वरदाहं सुरगणा वरं यं मनसेच्छथ ॥ तं वृणुध्वं
प्रयच्छामि जगतामुपकारकम् ॥ ३७ ॥ देवा ऊचुः ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

३८ ॥ सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥ ३९ ॥ दे-
व्युवाच ॥ ४० ॥ वैवस्वतेन्तरे प्राप्ते अष्टाविंशतिमेयु-
गे ॥ शुंभोनिशुंभश्चैवान्यावुत्पत्स्येते महासुरौ ॥ ४१
॥ नंदगोपगृहेजाता यशोदागर्भसंभवा ॥ ततस्तौना-
शयिष्यामि विंध्याचलनिवासिनी ॥ ४२ ॥ पुनरप्यति
रौद्रेण रूपेण पृथिवीतले ॥ अवतीर्यहनिष्यामि वैप्र-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

चित्तांस्तु दानवान् ॥ ४३ ॥ भक्षयंत्याश्च तानुग्रान्वै
प्रचित्तान्महासुरान् ॥ रक्ता दंता भविष्यंति दाडिमी
कुसुमोपमाः ॥ ४४ ॥ ततो मां देवताः स्वर्गे मर्त्यलोके च
मानवाः ॥ स्तुवंतो व्याहरिष्यंति सततं रक्तदंतिकाम् ॥
४५ ॥ भूयश्च शतवार्षिक्यामनावृष्ट्यामनंभसि ॥ मु-
निभिः संस्तुता भूमौ संभविष्याम्ययोनिजा ॥ ४६ ॥ त-
तः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् ॥ कीर्तयि-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

य्यंति मनुजाः शताक्षी मिति मां ततः॥४७॥ ततोहमखिलं
लोकमात्म देह समुद्भवैः ॥ भरिष्यामि सुराः शाकैरावृ-
ष्टेः प्राण धारकैः ॥ ४८ ॥ शाकंभरीति विख्यातिं तदा
यास्याम्यहं भुवि ॥ तत्रैव च वधिष्यामि दुर्गमाख्यं म-
हासुरम् ॥ ४९ ॥ दुर्गा देवीति विख्यातं तन्मे नाम भ-
विष्यति ॥ पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥
५० ॥ रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् १४७

CC-0. In Public Domain. Funding by IKS-MoE

॥ तदा मां मुनयः सर्वे स्तोष्यंत्यानम्रमूर्तयः ॥ ५१ ॥
भीमा देवीति विख्यातं तन्मे नाम भविष्यति ॥ यदा-
रुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ॥ ५२ ॥ त-
दाहं भ्रामरं रूपं कृत्वा संख्येयषट्पदम् ॥ त्रैलोक्य
स्य हितार्थाय वधिष्यामि महासुरम् ॥ ५३ ॥ भ्रामरी-
ति च मां लोकास्तदा स्तोष्यंति सर्वतः ॥ इत्थं यदा य-
दा बाधा दानवोत्था भविष्यति ॥ ५४ ॥ तदा तदाव

Digitized by eGangotri

नीर्याहं करिष्याम्यरिसंक्षयम् ॥ ५५॥ इति मार्कण्डेय
पुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये देव्याः स्तुतिः
॥ ११ ॥ देव्युवाच ॥ १ ॥ एभिः स्तवैश्च मां नित्यं स्तो
ष्यते यः समाहितः ॥ तस्याहं सकलां बाधां प्रशमि-
ष्याम्यसंशयम् ॥ २ ॥ मधुकैटभनाशं च महिषासुर
घातनम् ॥ कीर्तयिष्यन्ति ये तद्वद्वधं शुंभनिशुंभयोः ॥
३ ॥ अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ॥ श्रोष्यं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ॥ ४ ॥ न तेषां दु
ष्कृतं किंचिद्दुष्कृतोत्था न चापदः ॥ भविष्यति न दारि
द्र्यं न चैवेष्टवियोजनम् ॥ ५ ॥ शत्रुतो न भयं तस्य द
स्युतो वा न राजतः ॥ न शस्त्रानलतोयौघात्कदाचित्सं
भविष्यति ॥ ६ ॥ तस्मान्ममैतन्माहात्म्यं पठितव्यं
समाहितैः ॥ श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं हित
त् ॥ ७ ॥ उपसर्गानशेषांस्तु महामारीसमुद्भवान् ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥ ८ ॥ यत्रै-
तत्पठ्यते सम्यङ्नित्यमायतने मम ॥ सदा न तद्विमो-
क्ष्यामि सान्निध्यं तत्र मे स्थितम् ॥ ९ ॥ बलिप्रदाने पू-
जायामग्निकार्ये महोत्सवे ॥ सर्वं ममैतच्चरितमुच्चा-
र्य्यं श्राव्यमेव च ॥ १० ॥ जानताजानता वापि बलिपूजां
तथा कृताम् ॥ प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथा
कृतम् ॥ ११ ॥ शरत्काले महापूजा क्रियते या च वार्षि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

की ॥ तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥
॥१२॥ सर्वाबाधा विनिर्मुक्तो धनधान्यसुतान्वितः ॥ म-
नुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ १३ ॥ श्रुत्वा
ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः ॥ पराक्रमं च
युद्धेषु जायते निर्भयः पुमान् ॥ १४ ॥ रिपवः संक्षयं या-
न्ति कल्याणं चोपपद्यते ॥ नंदते च कुलं पुंसां माहात्म्यं
मम शृण्वताम् ॥ १५ ॥ शांतिकर्म्मणि सर्वत्र तथा दुः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

स्वप्नदर्शने ॥ ग्रहपीडासु चोग्रासु माहात्म्यं शृणुया-
न्मम ॥ १६ ॥ उपसर्गाः शमं यांति ग्रहपीडाश्च दारु-
णाः ॥ दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ १७ ॥
बालग्रहाभिभूतानां बालानां शांतिकारकम् ॥ संघा-
तभेदे च नृणां मैत्रीकरणमुत्तमम् ॥ १८ ॥ दुर्वृत्ता ना-
मशेषाणां बलहानिकरं परम् ॥ रक्षोभूतपिशाचानां
पठनादेव नाशनम् ॥ १९ ॥ सर्वं ममैतन्माहात्म्यं म-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

मसन्निधिकारकम् ॥ पशुपुष्पार्घ्यधूपैश्च गंधदीपै
स्तथोत्तमैः ॥ २० ॥ विप्राणां भोजनैर्होमैः प्रोक्षणीयै-
रहर्निशम् ॥ अन्यैश्च विविधै र्भोगैः प्रदानैर्वत्सरेण
या ॥ २१ ॥ प्रीतिर्मे क्रियते सास्मिन्सकृत्सुचरिते श्रुते
॥ श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ॥ २२ ॥ र
क्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम ॥ युद्धेषु चरि
तं यन्मे दुष्टदैत्यनिबर्हणम् ॥ २३ ॥ तस्मिञ्छ्रुते वैरि १४७

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

कृतं भयं पुंसां न जायते ॥ युष्माभिः स्तुतयो याश्च मा-
र्ग ब्रह्मर्षिभिः कृताः ॥ २४ ॥ ब्रह्मणा च कृतास्ताः स्तुव-
यच्छंति शुभां मतिम् ॥ अरण्ये प्रांतरे वापि दावाग्नि-
परिवारितः ॥ २५ ॥ दस्युभिर्वा वृतः शून्ये गृहीतो वा
पि शत्रुभिः ॥ सिंहव्याघ्रानुयातो वा वने वा वनहस्ति-
भिः ॥ २६ ॥ राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बंधगतो ऽ
पि वा ॥ आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥ २७

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

॥ २७ ॥ पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे ॥ स-
र्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ॥ २८ ॥ स्म-
रन्ममैतच्चरितं नरो मुच्येत संकटात् ॥ मम प्रभावा-
त्सिंहाद्या दस्यवो वैरिणस्तथा ॥ २९ ॥ दूरादेव पला-
यंते स्मरतश्चरितं मम ॥ ३० ॥ ऋषिरुवाच ॥ ३१ ॥
इत्युक्त्वा सा भगवती चंडिका चंडविक्रमा ॥ ३२ ॥ प-
श्यतामेव देवानां तत्रैवांतरधीयत ॥ तेऽपि देवा निरा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

नं काः स्वाधिकारान्यथापुरा ॥ ३३ ॥ यज्ञभागभुज-
स्सर्वे चक्रुर्विनिहतारयः ॥ दैत्याश्च देव्या निहते शुम्भे
देव रिपौ युधि ॥ ३४ ॥ जगद्विध्वंसिनि तस्मिन् महो
ग्रेऽतुलविक्रमे ॥ निशुंभे च महावीर्ये शेषाः पाताल
माययुः ॥ ३५ ॥ एवं भगवती देवी सा नित्यापि पुनःपु
नः ॥ संभूय कुरुते भूप जगतः परिपालनम् ॥ ३६ ॥
तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ॥ याचिता-

CC-0. In Public Domain. Funding by IKS-MoE

च विद्वानं तुष्टाऋद्धिं प्रयच्छति ॥ ३७ ॥ व्याप्तं तयैत-
त्सकलं ब्रह्मांडं मनुजेश्वर ॥ महाकाल्या महाकाले
महामारी स्वरूपया ॥ ३८ ॥ सैव काले महामारी सैव
सृष्टि भवत्यजा ॥ स्थितिं करोति भूतानां सैव काले स-
नातनी ॥ ३९ ॥ भवकाले नृणां सैव लक्ष्मी र्वृद्धि प्रद्‌
गृहे ॥ सैवा भावे तथा लक्ष्मी विनाशायो पजायते ॥
४० ॥ स्तुता संपूजिता पुष्पै र्धूप गंधादिभिस्तथा ॥

Digitized by eGangotri
CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ददाति वित्तं पुत्रांश्च मतिं धर्मे तथा शुभाम् ॥ ४१ ॥
इति मार्कण्डेय पुराणे सावर्णिके मन्वंतरे देवीमाह
त्म्ये फलस्तुतिः ॥ १२ ॥ ऋषिरुवाच ॥ १॥ एतत्ते कथि
तं भूप देवीमाहात्म्यमुत्तमम् ॥ एवंप्रभावा सा देवी य-
येदं धार्यते जगत् ॥ २॥ विद्या तथैव क्रियते भगव-
द्विष्णुमायया ॥ तया त्वमेष वैश्यश्च तथैवान्ये विवेकि-
नः ॥ ३॥ मोह्यंते मोहिताश्चैव मोहमेष्यंति चापरे ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

तामुपैहि महाराज शरणां परमेश्वरीम् ॥ ४ ॥ आराधि-
ता सैव नृणां भोग स्वर्गापवर्गदा ॥ ५ ॥ मार्कण्डेय उवा-
च ॥ ६ ॥ इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ॥ ७
॥ प्रणिपत्य महाभागां तमृषिं संसितव्रतम् ॥ निर्विण्णो-
ऽतिममत्वेन राज्यापहरणेन च ॥ ८ ॥ जगाम सद्यस्तप-
से स च वैश्यो महामुने ॥ संदर्शनार्थमम्बाया नदी पुलि-
न संस्थितः ॥ ९ ॥ स च वैश्यस्तपस्तेपे देवी सूक्तं परं ज- १५

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

पन् ॥ तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्तिं महीमयी-
म् ॥ १० ॥ अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः
॥ निराहारौ यताहारौ तन्मनस्कौ समाहितौ ॥ ११ ॥ दद-
तुस्तौ बलिं चैव निजगात्रासृगुक्षितम् ॥ एवं समारा-
धयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥ १२ ॥ परितुष्टा जगद्धा-
त्री प्रत्यक्षं प्राह चंडिका ॥ १३ ॥ देव्युवाच ॥ १४ ॥ य-
त्प्रार्थ्यते त्वया भूप त्वया च कुलनंदन ॥ मत्तस्तत्प्रा- १५

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

प्यतां सर्वं परितुष्टा ददामि तत् ॥ २५ ॥ मार्कण्डेय उवाच ॥ २६ ॥ ततो बव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ॥
अत्रैव चानिजं राज्यं हतशत्रुबलं बलात् ॥ २७ ॥ सोऽपि वैश्यस्ततो ज्ञानं बव्रे निर्विण्णमानसः ॥ ममेत्यहमिति प्राज्ञः संगविच्युतिकारकम् ॥ २८ ॥ देव्युवाच ॥ २९ ॥ स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥
२० ॥ हत्वारिपून्स्खलितं तव तत्र भविष्यति ॥ २१ ॥ २

CC-0. In Public Domain. Funding by IKS-MoE

पन् ॥ तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्तिं महीमय-
मू ॥ १० ॥ अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः
॥ निराहारौ यताहारौ तन्मनस्कौ समाहितौ ॥ ११ ॥ दद
तुस्तौ बलिं चैव निजगात्रासृगुक्षितम् ॥ एवं समारा
धयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥ १२ ॥ परितुष्टा जगद्धा-
त्री प्रत्यक्षं प्राह चंडिका ॥ १३ ॥ देव्युवाच ॥ १४ ॥ य-
त्प्रार्थ्यते त्वया भूप त्वया च कुलनंदन ॥ मत्तस्तत्प्रा- १५

Digitized by eGangotri
CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

प्यतां सर्वं परितुष्टा ददामि तत् ॥ २५ ॥ मार्कण्डेय उवा
च ॥ २६ ॥ ततो वब्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ॥
अत्रैव चा निजं राज्यं हतशत्रुबलं बलात् ॥ २७ ॥ सोऽ
पि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ॥ ममेत्यह
मिति प्राज्ञः संगविच्युतिकारकम् ॥ २८ ॥ देव्युवाच
॥ २९ ॥ स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥
३० ॥ हत्वारिपून स्खलितं तव तत्र भविष्यति ॥ ३१ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

ततश्च भूयः संप्राप्य जन्म देवाद्विवस्वतः ॥ २२ ॥
सावर्णिको मनुर्नाम भवान् भुवि भविष्यति ॥
२३ ॥ वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवाञ्छितः ॥ २४
तं प्रयच्छामि संसिद्धौ तव ज्ञानं भविष्यति ॥ २५ ॥ मा-
र्कण्डेय उवाच ॥ २६ ॥ इति दत्त्वा तयोर्देवी यथाभिल-
षितं वरम् ॥ बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता
२७ ॥ एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥ सूर्याज्जन्म २८

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

समा साद्य सावर्णि र्भविता मनुः ॥ २८ ॥ सावर्णि र्भ-
विता मनुः ॥ २९ ॥ इति मार्कण्डेय पुराणे सावर्णि
के मन्वंतरे देवी माहात्म्ये सुरथ वैश्ययो र्वर प्रदानं
नाम त्रयो दशो ऽध्यायः ॥ १३ ॥ इति दुर्गा स्तोत्रं स-
म्पूर्णम् ॥ सम्बत् १९३१ ॥ मिती फाल्गुण कृष्ण १३
भृगुवार ॥ लि० बैजनाथ गुर्ज्जर लक्ष्मण पुर मध्ये ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

स्तस्य भूयः संप्राप्य जन्म देवा द्विवस्वतः ॥ २२ ॥
सावर्णिको मनुर्नाम भवान् भुवि भविष्यति ॥
२३ ॥ वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवांछितः ॥ २४
तं प्रयच्छामि संसिद्धौ तव ज्ञानं भविष्यति ॥ २५ ॥ मा-
र्कंडेय उवाच ॥ २६ ॥ इति दत्त्वा तयोर्देवी यथाभिल-
षितं वरम् ॥ बभूवांतर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता
२७ ॥ एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥ सूर्याज्जन्म २८

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

समा साद्य सावर्णि र्भविता मनुः ॥ २८ ॥ सावर्णि र्भ-
विता मनुः ॥ २९ ॥ इति मार्कण्डेय पुराणे सावर्णि
के मन्वंतरे देवी माहात्म्ये सुरथ वैश्ययो र्वर प्रदानं
नाम त्रयो दशो ऽध्यायः ॥ १३ ॥ इति दुर्गा स्तोत्रं स-
म्पूर्णम् ॥ सम्बत् १९३१ ॥ मिती फाल्गुण कृष्ण १३
भृगु वार ॥ लि० बैजनाथ गुर्ज्जर लक्ष्मण पुर मध्ये ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

~~Sutra~~ Stotra

Sastra

No: 1

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Wurga Tutra

N. K.

acl 20824

25.02.13

Stom

no

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

Bhakti Gharsha
Stories etc

891.237
M33D.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri

CC-0. In Public Domain. Funding by IKS-MoE